॥ નમો નમઃ શ્રીગુરુપ્રેમસૂરયે ॥

श्री क्षमाकल्याण विरचितम्

# ॥ गद्यबद्ध श्री यशोधरचरित्रम् ॥

-: प्रकाशक :-

श्री जिनशासन आराधना ट्रस्ट

दुकान नं. ५, बद्रिकेश्वर सोसायटी, ८२, नेताजीसुभाष रोड,
मरीन ड्राइव, 'इ' रोड , मुंबई - ४०० ००२.

वीरसंवत २५२७

मूल्य रु. ४०/-

# ભાવભરી અનુમોદના

પ.પૂ. આચાર્ય દેવ શ્રીમદ્‌વિજય **હેમચંદ્રસૂરિ** મહારાજના શિષ્યો મુનિશ્રી **સંવેગવર્ધન વિજયજી** મ.સા.

તથા મુનિશ્રી **હિરણ્યબોધિવિજયજી** મ. સા. ના સંવત ૨૦૫૬ ના ચાતુર્માસની સ્મૃતિ નિમિત્તે

**શ્રી તપગચ્છ જૈન સમાજ - મુલુંડ (મુંબઈ)ના**

જ્ઞાનનિધિમાંથી પ્રસ્તૂત ગ્રંથના પ્રકાશનનો સંપૂર્ણ લાભ લેવામાં આવેલ છે.

આની ભૂરિ ભૂરિ અનુમોદના કરીએ છીએ.

લી.

**શ્રીઁ જિનશાસન આરાધના ટ્રસ્ટ**

# પ્રકાશકીય

ચૌદસો ચુમ્માલીસ ગ્રંથના રચયિતા આચાર્ય દેવ શ્રી હરિભદ્રસૂરિ મ. સા. રચિત સમરાઇચ્ચ કહા (પ્રાકૃત) જૈન સંઘમાં અતિપ્રસિદ્ધ છે. આમાં સમરાદિત્ય કુમારના નવ ભવનું વર્ણન છે. લગભગ દરેક ભવમાં અંતર્ગત ચરિત્રો પણ આવે છે. ચોથા ધન્યકુમારના ભવમાં ધન્યકુમારને યશોધરસૂરિએ પોતાનું ચરિત્ર પણ કહેલ છે. આ ચરિત્ર અત્યંત રોમાંચક તથા વૈરાગ્યજનક છે.

મુનિશ્રી ક્ષમાકલ્યાણ વિજયજીએ આ જ યશોધર ચરિત્રને સંસ્કૃત ભાષામાં સંવત ૧૮૩૯ માં રચ્યું છે.

વિક્રમ સંવત ૧૯૭૪ માં આ ગ્રંથ ને અમૃતલાલ અમરચંદે સંશોધિત કરી એ. એમ. કંપની તરફથી મગનલાલ વેલચંદે પ્રકાશિત કરેલ છે. ૮૩ વર્ષ પ્રાચીન આ ગ્રંથને **અમો પુન:** પ્રકાશિત કરી રહ્યા છીએ. આ પ્રસંગે પૂર્વ સંશોધક અને પ્રકાશક પ્રત્યે કૃતજ્ઞતાના ભાવને અત્રે પ્રદર્શિત કરીએ છીએ.

પ્રસ્તૂત ગ્રંથ અનેક પુણ્યાત્માઓના હૃદયમાં વૈરાગ્યભાવની વૃદ્ધિ કરનાર થાવ એ જ શુભેચ્છા.

વિશેષ શ્રુતભક્તિનો લાભ મળતો રહે તેવી શ્રુતાધિષ્ઠાયિકા દેવી સરસ્વતીને ભાવભરી પ્રાર્થના.

**લી. શ્રી જિનશાસન આરાધના ટ્રસ્ટ વતી ટ્રસ્ટીઓ**

ચંદ્રકુમાર બાબુભાઈ જરીવાલા　　　　લલિતકુમાર રતનચંદ કોઠારી

પુંડરીકભાઈ અંબાલાલ શાહ


# પ્રાપ્તિસ્થાન

✿ **શ્રી જિનશાસન આરાધના ટ્રસ્ટ**
દુકાન નં. ૫, બદ્રિકેશ્વર સોસાયટી,
૮૨, નેતાજી સુભાષ રોડ,
મરીન ડ્રાઈવ, 'ઈ' રોડ,
મુંબઈ - ૪૦૦ ૦૦૨.


✿ **બંસીલાલ અંબાલાલ શાહ**
જૈન યાત્રિક ભુવન,
માણેક ચોક, ખંભાત.

✿ **શ્રી જિનશાસન આરાધના ટ્રસ્ટ**
C/o. ચંદ્રકાંત એસ. સંઘવી
બી-૬, અશોકા કોમ્પલેક્ષ,
પહેલા ગરનાળા પાસે,
પાટણ (ઉ. ગુ.) પીન ૩૮૪૨૬૫.

✿ **મૂળીબેન અંબાલાલ**
**રતનચંદ જૈન ધર્મશાળા,**
સ્ટેશન રોડ, વીરમગામ.



નમો અરિહંતાણં
નમો સિદ્ધાણં
નમો આયરિયાણં
નમો ઉવજ્ઝાયાણં
નમો લોએ સવ્વસાહૂણં
એસો પંચ નમુક્કારો
સવ્વ પાવપ્પણાસણો
મંગલાણં ચ સવ્વેસિં
પઢમં હવઇ મંગલં
દ. પ્રે. વિ



કર્મસાહિત્ય વિશારદ, સિદ્ધાંતમહોદધિ, પરમ પૂજ્ય આચાર્ય ભગવંત શ્રીમદ્ વિજય **પ્રેમસૂરીશ્વરજી** મહારાજા

મોક્ષમાર્ગના સાચા સારથી, સૂરિ પ્રેમના આજ્ઞાંકિત પટ્ટાલંકાર પ.પૂ. આ. ભ. શ્રીમદ્ વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજા

। નમો નમઃ શ્રીગુરુપ્રેમસૂરયે ।

દિવ્ય કૃપા :- સિદ્ધાંતમહોદધિ સ્વ. આચાર્ય દેવ શ્રીમદ્ વિજય **પ્રેમસૂરીશ્વરજી** મહારાજા.

દિવ્યાશીષ :- વર્ધમાન તપોનિધિ ગચ્છાધિપતિ સ્વ. આચાર્ય દેવ શ્રીમદ્ વિજય
**ભુવનભાનુસૂરીશ્વરજી** મહારાજા.

પુણ્યપ્રભાવ :- પરમ પૂજ્ય સમતાસાગર સ્વ. પંન્યાસજીશ્રી **પદ્મવિજયજી** ગણિવર્યશ્રી.

શુભાશીષ :- સિદ્ધાંતદિવાકર ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મહારાજ

-: પ્રેરણા-માર્ગદર્શન :-

પ. પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્ય દેવ શ્રીમદ્ વિજય **હેમચંદ્રસૂરિ** મહારાજા

શ્રુતસેવાના કાર્યમાં મહાન સાથીઓ

# શ્રુતસમુદ્ધારક

૧. ભાણબાઈ નાનજી ગડા, મુંબઈ. (પ.પૂ. ગચ્છાધિપતિ આચાર્ય દેવ શ્રીમદ્વિજય ભુવનભાનુસૂરિ મ.સા.ના ઉપદેશથી)

૨. શેઠ આણંદજી કલ્યાણજી, અમદાવાદ.

૩. શ્રી શાંતિનગર શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
( પ. પૂ. તપસમ્રાટ આચાર્યદેવ શ્રીમદ્વિજય હિમાંશુસૂરિ મ. સા. ની પ્રેરણાથી )

૪. શ્રી શ્રીપાળનગર જૈન ઉપાશ્રય ટ્રસ્ટ, વાલકેશ્વર, મુંબઈ. ( પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય રામચંદ્રસૂરિ મ.સા.ની દિવ્યકૃપા તથા પૂ. આચાર્યદેવ શ્રીમદ્વિજય મિત્રાનંદ સૂ. મ.સા.ની પ્રેરણાથી )

૫. શ્રી લાવણ્ય સોસાયટી શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
( પ. પૂ. પંન્યાસજી શ્રી કુલચંદ્રવિજયજી ગણિવર્યની પ્રેરણાથી )

૬. નયનબાળા બાબુભાઈ સી. જરીવાળા હા. ચંદ્રકુમાર, મનીષ, કલ્પનેશ
( પ. પૂ. મુનિરાજશ્રી કલ્યાણબોધિ વિજયજી મ. સા. ની પ્રેરણાથી )

૭. કેશરબેન રતનચંદ કોઠારી હા. લલિતભાઈ
( પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મહારાજાની પ્રેરણાથી )

## શ્રુતસેવાના કાર્યમાં સદાના સાથીઓ

૮. શ્રી શ્વેતાંબર મૂર્તિપૂજક તપગચ્છીય જૈન પૌષધશાળા ટ્રસ્ટ, દાદર, મુંબઈ.
૯. શ્રી મુલુંડ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, મુલુંડ, મુંબઈ. ( આચાર્ય દેવ શ્રી હેમચંદ્રસૂરિ મ.સા. ની પ્રેરણાથી )
૧૦. શ્રી શાંતાક્રુઝ શ્વે. મૂર્તિ. તપાગચ્છ સંઘ, શાંતાક્રુઝ, મુંબઈ. ( આચાર્ય દેવ શ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી)
૧૧. શ્રી દેવકરણ મૂળજીભાઈ જૈન દેરાસર પેઢી, મલાડ (વેસ્ટ), મુંબઈ.
( પ. પૂ. મુનિરાજશ્રી સંયમબોધિ વિ. મ. સા. ની પ્રેરણાથી )
૧૨. સંઘવી અંબાલાલ રતનચંદ જૈન ધાર્મિક ટ્રસ્ટ, ખંભાત. ( પૂ. સા. શ્રી વસંતપ્રભાશ્રીજી મ. તથા પૂ. સા. શ્રી સ્વયંપ્રભાશ્રીજી મ. તથા પૂ. સા. શ્રી દિવ્યયશાશ્રીજી મ. ની પ્રેરણાથી મૂળીબેનની આરાધનાની અનુમોદનાર્થે )
૧૩. બાબુ અમીચંદ પનાલાલ આદીશ્વર જૈન ટેમ્પલ ચેરીટેબલ ટ્રસ્ટ, વાલકેશ્વર, મુંબઈ - ૪૦૦ ૦૦૬.
( પૂ. મુનિરાજશ્રી અક્ષયબોધિ વિજયજી મ. સા. તથા પૂ. મુનિરાજશ્રી મહાબોધિ વિજયજી મ. સા. તથા પૂ. મુનિરાજશ્રી હિરણ્યબોધિ વિજયજી મ. સા. ની પ્રેરણાથી )
૧૪. શ્રી શ્રેયસ્કર અંધેરી ગુજરાતી જૈન સંઘ, મુંબઈ.
( પૂ. મુનિશ્રી હેમદર્શન વિ. મ. તથા પૂ. મુનિશ્રી રમ્યઘોષ વિ. મ. ની પ્રેરણાથી)
૧૫. શ્રી જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, મંગળપારેખનો ખાંચો, શાહપુર, અમદાવાદ.
( પ. પૂ. આચાર્યદેવ શ્રી રૂચકચંદ્ર સૂરિ મ. ની પ્રેરણાથી )

## શ્રુતસેવાના કાર્યમાં સહાના સાથીઓ

૧૬. શ્રી પાર્શ્વનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, સંઘાણી એસ્ટેટ, ઘાટકોપર, (વેસ્ટ) મુંબઈ.
( પૂ. મુનિરાજશ્રી કલ્યાણબોધિ વિજયજી મ. સા. ની પ્રેરણાથી)

૧૭. શ્રી નવજીવન સોસાયટી જૈન સંઘ, બોમ્બે સેન્ટ્રલ, મુંબઈ. (પૂ. મુનિરાજશ્રી અક્ષયબોધિ વિ.મ.ની પ્રેરણાથી)

૧૮. શ્રી કલ્યાણજી સોભાગચંદ જૈન પેઢી, પીંડવાડા.
( સિદ્ધાંતમહોદધિ સ્વ. આ. શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મ. સા. ના સંયમની અનુમોદનાર્થે )

૧૯. શ્રી ઘાટકોપર જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, ઘાટકોપર (વેસ્ટ), મુંબઈ.
( વૈરાગ્યદેશનાદક્ષ પૂ. આ. શ્રી હેમચંદ્રસૂરિ મ. સા. ની પ્રેરણાથી )

૨૦. શ્રી આંબાવાડી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ. (પૂ. મુનિ શ્રી કલ્યાણબોધિ વિ. મ. ની પ્રેરણાથી)

૨૧. શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, વાસણા, અમદાવાદ. ( પૂ. આચાર્ય શ્રી નરરત્નસૂરિ મ. ના સંયમજીવનની અનુમોદનાર્થે પૂજ્ય તપસ્વી રત્ન આચાર્ય શ્રી હિમાંશુસૂરીશ્વરજી મ. સા. ની પ્રેરણાથી )

૨૨. શ્રી પ્રેમવર્ધક આરાધક સમિતિ, ધરણિધર દેરાસર, પાલડી, અમદાવાદ..
( પૂ. ગણિવર્ય શ્રી અક્ષયબોધિ વિજયજી મ. ની પ્રેરણાથી )

૨૩. શ્રી મહાવીર જૈન શ્વે. મૂર્તિપૂજક સંઘ, પાલડી, અમદાવાદ. શેઠ કેશવલાલ મૂળચંદ જૈન ઉપાશ્રય.
(પ. પૂ. આચાર્ય શ્રી રાજેન્દ્રસૂરિ મહારાજ સા. ની પ્રેરણાથી )

## શ્રુતસેવાના કાર્યમાં સહાયક સાથીઓ

૨૪. શ્રી માટુંગા જૈન શ્વેતા. મૂર્તિપૂજક તપગચ્છ સંઘ એન્ડ ચેરિટીઝ, માટુંગા, મુંબઈ.

૨૫. શ્રી જીવીત મહાવીરસ્વામી જૈન સંઘ, નાંદિયા. (રાજસ્થાન)
( પૂ. ગણિવર્ય શ્રી અક્ષયબોધિ વિજયજી મ. સા. તથા મુનિશ્રી મહાબોધિ વિજયજી મ. સા. ની પ્રેરણાથી )

૨૬. શ્રી વિશા ઓશવાળ તપગચ્છ જૈન સંઘ, ખંભાત.
( વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્ય દેવ શ્રી હેમચંદ્રસૂરિ મ. સા. ની પ્રેરણાથી )

૨૭. શ્રી વિમલ સોસાયટી આરાધક જૈન સંઘ, બાણગંગા, વાલકેશ્વર મુંબઈ - ૪૦૦ ૦૦૬.

૨૮. શ્રી પાલિતાણા ચાતુર્માસ આરાધના સમિતિ.
( પરમ પૂજ્ય વૈરાગ્ય દેશનાદક્ષ આચાર્ય દેવ શ્રીમદ્ વિજય હેમચંદ્રસૂરિશ્વરજી મહારાજ સાહેબના સંવત ૨૦૫૩ ના પાલિતાણા મધ્યે ચાતુર્માસ પ્રસંગે )

૨૯. શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ, એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (ઈ), મુંબઈ.
( મુનિશ્રી નેત્રાનંદ વિજયજી મ. સા. ની પ્રેરણાથી )

૩૦. શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, જૈન નગર, અમદાવાદ.
( પ. પૂ. મુનિરાજશ્રી સંયમબોધિ વિજયજી મ. સા. ની પ્રેરણાથી )

૩૧. શ્રી કૃષ્ણનગર જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, સૈજપુર, અમદાવાદ.

( પ. પૂ. આચાર્ય વિજય હેમચંદ્રસુરીશ્વરજી મ. સા. ના કૃષ્ણનગર મધ્યે સંવત ૨૦૫૨ ના ચાતુર્માસ નિમીત્તે
પ. પૂ. મુનિરાજશ્રી કલ્યાણબોધિ વિજય મ. સા. ની પ્રેરણાથી )

૩૨. શ્રી બાબુભાઈ સી. જરીવાળા ટ્રસ્ટ, નિઝામપુરા, વડોદરા - ૩૯૦ ૦૦૨.

૩૩. શ્રી ગોડી પાર્શ્વનાથજી ટેમ્પલ ટ્રસ્ટ, પુના.
( પૂ. ગચ્છાધિપતિ આચાર્ય દેવ શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મ. સા. તથા
પૂ. મુનિરાજશ્રી મહાબોધિ વિજયજી મ. સા. ની પ્રેરણાથી )

૩૪. શ્રી શંખેશ્વર પાર્શ્વનાથ જૈન શ્વેતામ્બર મંદિર ટ્રસ્ટ, ભવાની પેઠ, પુના.
(પૂ. મુનિરાજ શ્રી અનંતબોધિ વિજયજી મ. સા. ની પ્રેરણાથી)

૩૫. શ્રી રાંદેર રોડ જૈન સંઘ, સુરત.
(પૂ. પં. શ્રી અક્ષયબોધિ વિજયજી મ. સા. ની પ્રેરણાથી)

૩૬. શ્રી શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ દાદર જૈન પૌષધશાળા ટ્રસ્ટ, આરાધના ભુવન, દાદર, મુંબઈ.
(મુનિ શ્રી અપરાજિત વિજયજી મ. સા. ની પ્રેરણાથી)

૩૭. શ્રી જવાહર નગર જૈન શ્વે. મૂર્તિ. સંઘ, ગોરેગામ, મુંબઈ.
(પૂ. આ. શ્રી રાજેન્દ્રસૂરિ મ. સા. ની પ્રેરણાથી)

૩૮. શ્રી કન્યાશાળા જૈન ઉપાશ્રય, ખંભાત. (પૂ. પ્ર. શ્રી રંજનશ્રીજી મ. સા., પૂ. પ્ર. શ્રી ઈંદ્રશ્રીજી મ. સા. ના સંયમજીવનની અનુમોદનાર્થે પ. પૂ. સા. શ્રી વિનયપ્રભાશ્રીજી મ. સા. તથા પ. પ્ર. સા. શ્રી વસંતપ્રભાશ્રીજી મ. સા. તથા સાધ્વીજી શ્રી સ્વયંપ્રભાશ્રીજી મ. સા. ની પ્રેરણાથી)

૩૯. શ્રી માટુંગા જૈન શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ સંઘ એન્ડ ચેરીટીઝ, માટુંગા, મુંબઈ. (પૂ. પંન્યાસપ્રવર શ્રીજયસુંદરવિજયજી ગણિવર્યની પ્રેરણાથી)

૪૦. શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, ૬૦ ફુટ રોડ, ઘાટકોપર (ઈ.) (પૂ. પં. શ્રી વરબોધિવિજયજી ગણિવર્યની પ્રેરણાથી)

૪૨. શ્રી આદિનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, નવસારી. (પ. પૂ. આ. શ્રી ગુણરત્નસૂરિ મ.ના શિષ્ય પૂ. પંન્યાસજી શ્રી પુણ્યરત્નવિજયજી ગણિવર્યની તથા પૂ. પં. યશોરત્નવિજયજી ગણિવર્યની પ્રેરણાથી)

૪૩. શ્રી કોઈમ્બતુર જૈન શ્વેતાંમ્બર મૂર્તિપૂજક સંઘ, કોઈમ્બતુર.

૪૪. શ્રી પંકજ સોસાયટી જૈન સંઘ ટ્રસ્ટ, પાલડી, અમદાવાદ. (પ. પૂ. આ. શ્રી ભુવનભાનુસૂરિ મ. સા. ની ગુરુમૂર્તિ પ્રતિષ્ઠા પ્રસંગે થયેલ આચાર્ય-પંન્યાસ-ગણિ પદારોહણ દિક્ષા વગેરે નિમિત્તે થયેલ જ્ઞાનનિધિમાંથી.)

૪૫. શ્રી મહાવીરસ્વામી જૈન શ્વેતાંમ્બર મૂર્તિપૂજક દેરાસર, પાવાપુરી, ખેતવાડી, મુંબઈ. (પૂ. મુનિશ્રી રાજપાલવિજયજી મ.સા. તથા પૂ. પં. શ્રી અક્ષયબોધિવિજયજી મ.સા. ની પ્રેરણાથી)

૪૬. શ્રી હીરસૂરીશ્વરજી જગદ્ગુરુ શ્વેતાંમ્બર મૂર્તિપૂજક જૈન સંઘ ટ્રસ્ટ, મલાડ (પૂર્વ), મુંબઈ.

૪૭. શ્રી પાર્શ્વનાથ શ્વે. મૂર્તિપૂ. જૈન સંઘ, સંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઈ.

# શ્રુતસેવાના કાર્યમાં સદાના સાથીઓ

## શ્રુતોદ્ધારક

૧. શ્રી લક્ષ્મીવર્ધક જૈન સંઘ, પાલડી, અમદાવાદ. (પ.પૂ. મુનિરાજશ્રી નિપુણચંદ્ર વિજય મ.સા.ની પ્રેરણાથી ).

૨. શ્રી નડીયાદ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નડીયાદ. (પ.પૂ. મુનિ શ્રી વરબોધિ વિજયજી મ.સા.ની પ્રેરણાથી).

૩. શ્રી સાયન શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, સાયન, મુંબઈ.

૪. શ્રી પાર્શ્વનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, સંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઈ.

## શ્રુતભક્ત

૧. શ્રી બાબુભાઈ સી. જરીવાલા ટ્રસ્ટ, નિઝામપુરા, વડોદરા.

૨. શ્રી બાપુનગર શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
( પૂ. ગણિવર્યશ્રી અક્ષયબોધિવિજયજી મ.સા. તથા મુનિરાજશ્રી મહાબોધિ વિજયજી મ.સા.ની પ્રેરણાથી )

૩. શ્રી સુમતિનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, મેમનગર, અમદાવાદ.
( પૂ. મુનિરાજશ્રી ધર્મરક્ષિત વિ. મ. તથા પૂ. મુનિરાજશ્રી હેમદર્શન વિ. મ. ની પ્રેરણાથી )

૪. સ્વ. શ્રી સુંદરલાલ દલપતભાઈ ઝવેરી. હા. જાસુદબેન, પુનમચંદભાઈ, જસવંતભાઈ વગેરે.

૫. શ્રી મુનિસુવ્રત સ્વામિ જૈન શ્વેતાંબર મૂર્તિપૂજક મંદિર ટ્રસ્ટ, કોલ્હાપુર.

૬. શ્રી અરવિંદકુમાર કેશવલાલ ઝવેરી જૈન રિલિજીયસ ટ્રસ્ટ, ખંભાત.

# શ્રી જિનશાસન આરાધના ટ્રસ્ટ–મુંબઈ દ્વારા પ્રકાશિત થયેલા ગ્રંથોની સૂચિ

૧ જીવવિચાર પ્રકરણ સટીક દંડક પ્રકરણ સટીક કાર્યસ્થિતિ સ્તોત્રાભિધાન સટીક.
૨ ન્યાયસંગ્રહ સટીક.
૩ ધર્મસંગ્રહ સટીક ભાગ-૧
૪ ધર્મસંગ્રહ સટીક ભાગ-૨
૫ ધર્મસંગ્રહ સટીક ભાગ-૩
૬ જીવસમાસ ટીકાનુવાદ
૭ જંબુદ્વીપ સંગ્રહણી સટીક
૮ સ્યાદ્વાદમંજરી સાનુવાદ
૯ સંક્ષેપ સમરાદિત્ય કેવળી ચરિત્ર
૧૦ બૃહત્ક્ષેત્રસમાસ સટીક
૧૧ બૃહત્ સંગ્રહણી સટીક
૧૨ બૃહત્ સંગ્રહણી સટીક
૧૩ ચેઈયવંદણ મહાભાસ
૧૪ નયોપદેશ સટીક
૧૫ પુષ્પમાળા (મૂળ અનુવાદ)
૧૬ મહાવીરચરિયં
૧૭ મલ્લિનાથ ચરિત્ર
૧૮ વાસુપૂજ્ય ચરિત્ર
૧૯ શાંતસુધારસ સટીક
૨૦ શ્રાદ્ધગુણ વિવરણ
૨૧ તત્ત્વજ્ઞાન તરંગિણી
૨૨ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ ૩/૪
૨૩ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ ૫/૬
૨૪ અષ્ટસહસ્રી તાત્પર્ય વિવરણ
૨૫ મુક્તિપ્રબોધ
૨૬ વિશેષણવતીવંદન પ્રતિક્રમણ અવચૂરી
૨૭ પ્રવ્રજ્યા વિધાન કુલક સટીક

૨૮ ચૈત્યવંદન ભાષ્ય (સંઘાચાર ભાષ્ય સટીક)
૨૯ વર્ધમાનદેશના પદ્ય (ભાગ-૧ છાયા સાથે)
૩૦ વર્ધમાનદેશના પદ્ય (ભાગ-૨ છાયા સાથે)
૩૧ વ્યવહાર શુદ્ધિ પ્રકાશ
૩૨ અનેકાન્ત વ્યવસ્થા પ્રકરણ
૩૩ પ્રકરણ સંદોહ
૩૪ ઉત્પાદાદિસિદ્ધિ પ્રકરણ સટીક
૩૫ અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભાગ-૧ (ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન)
૩૬ અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભાગ-૨ (ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન)
૩૭ પ્રશ્નોત્તર રત્નાકર (સેનપ્રશ્ન)
૩૮ સંબોધસપ્તતિ સટીક
૩૯ પંચવસ્તુ સટીક
૪૦ શ્રી જંબુસ્વામી ચરિત્ર
૪૧ શ્રી સમ્યક્ત્વ સપ્તતિ સટીક
૪૨ ગુરુ ગુણ ષટ્ત્રિંશત્ષટ્ત્રિંશિકા સટીક
૪૩ સ્તોત્ર રત્નાકર
૪૪ ઉપદેશ સપ્તતિ
૪૫ ઉપદેશ રત્નાકર
૪૬ શ્રી વિમલનાથ ચરિત્ર
૪૭ સુબોધા સમાચારિ
૪૮ શાંતિનાથ ચરિત્ર ગ્રંથ
૪૯ નવપદ પ્રકરણ સટીક ભાગ-૧
૫૦ નવપદ પ્રકરણ સટીક ભાગ-૨
૫૧ નવપદ પ્રકરણ લઘુ વૃત્તિ
૫૨ શ્રાદ્ધ પ્રકરણ વૃત્તિ
૫૩ શ્રી પાર્શ્વનાથ ચરિત્ર
૫૪ વિજયપ્રશસ્તિ ભાષ્ય (વિજયસેનસૂરિ ચરિત્ર)
૫૫ કુમારપાળ મહાકાવ્ય સટીક (પ્રાકૃતદ્વયાશ્રય)
૫૬ ધર્મરત્ન પ્રકરણ સટીક ભાગ-૧
૫૭ ધર્મરત્ન પ્રકરણ સરીક ભાગ-૨
૫૮ ઉપદેશ પદ ભાગ-૧
૫૯ ઉપદેશ પદ ભાગ-૨

૬૦ શ્રાદ્ધદિનકૃત્ય ભાગ-૧
૬૧ શ્રાદ્ધદિનકૃત્ય ભાગ-૨
૬૨ પાર્શ્વનાથ ચરિત્ર
૬૩ વિચાર રત્નાકર
૬૪ ઉપદેશ સમતિકા
૬૫ દેવેન્દ્ર નરકેન્દ્ર પ્રકરણ
૬૬ પુષ્પ પ્રકરણ માળા
૬૭ ગુર્વાવલી
૬૮ પુષ્પ પ્રકરણ
૬૯ નેમિનાથ મહાકાવ્ય
૭૦ પાંડવ ચરિત્ર ભાગ-૧
૭૧ પાંડવ ચરિત્ર ભાગ-૨
૭૨ પાર્શ્વનાથ ચરિત્ર ગદ્ય
૭૩ હીર પ્રશ્નોત્તરાણિ
૭૪ ધર્મવિધિ પ્રકરણ
૭૫ સુપાર્શ્વનાથ ચરિત્ર ભાગ-૧
૭૬ દેવધર્મ પરીક્ષાદિ ગ્રંથો
૭૭ સુપાર્શ્વનાથ ચરિત્ર ભાગ-૨-૩
૭૮ પ્રકરણત્રયી
૭૯ સમતાશતક (સાનુવાદ)
૮૦ ઉપદેશમાળા-પુષ્પમાળા
૮૧ પૃથ્વીચંદ્ર ચરિત્ર
૮૨ ઉપદેશમાળા
૮૩ પાઈયલચ્છી નામમાલા
૮૪ દોઢસો સવાસો ગાથાના સ્તવનો
૮૫ દ્વિવર્ણ રત્નમાલા
૮૬ શાલિભદ્ર ચરિત્ર
૮૭ અનંતનાથ ચરિત્ર પૂજાષ્ટક
૮૮ કર્મગ્રંથ અવચૂરી
૮૯ ઉપમિતિ ભવ પ્રપંચ કથા ભા.-૧
૯૦ ધર્મબિન્દુ સટીક
૯૧ પ્રશમરતિ સટીક
૯૨ માર્ગણાદ્વાર વિવરણ
૯૩ કર્મસિદ્ધિ

૯૪ જંબુસ્વામી ચરિત્ર અનુવાદ
૯૫ ચૈત્યવંદન ભાષ્ય સાનુવાદ
૯૬ ગુણવર્મા ચરિત્ર સાનુવાદ
૯૭ સવાસો દોઢસો ગાથા સ્તવનો
૯૮ દ્વાત્રિંશત્દ્વાત્રિંશિકા
૯૯ કથાકોષ
૧૦૦ જૈન તીર્થ દર્શન
૧૦૧ જૈન કથા સંગ્રહ ભાગ-૧
૧૦૨ જૈન કથા સંગ્રહ ભાગ-૨
૧૦૩ જૈન કથા સંગ્રહ ભાગ-૩
૧૦૪ રયણસેહર નિવકહા સટીક
૧૦૫ આરંભસિદ્ધિ
૧૦૬ નેમિનાથ ચરિત્ર ગદ્ય
૧૦૭ મોહોન્મુલનમ્ (વાદસ્થાનમ્)
૧૦૮ શ્રી ભુવનભાનુ કેવળી ચરિત્ર (અનુવાદ)
૧૦૯ શ્રી ચંદ્રપ્રભસ્વામી ચરિત્ર (અનુવાદ)
૧૧૦ આપણા જ્ઞાનમંદિરો
૧૧૧ પ્રમાલક્ષણ
૧૧૨ આચાર પ્રદીપ
૧૧૩ વિવિધ પ્રશ્નોત્તર
૧૧૪ આચારોપદેશ અનુવાદ
૧૧૫ પટ્ટાવલી સમુચ્ચય ભાગ-૧
૧૧૬ પટ્ટાવલી સમુચ્ચય ભાગ-૨
૧૧૭ રત્નાકરાવતારિકા અનુવાદ ભાગ-૧
૧૧૮ રત્નાકરાવતારિકા અનુવાદ ભા-૨
૧૧૯ ચૈત્યવંદન ચોવીસી તથા પ્રશ્નોત્તર ચિંતામણી
૧૨૦ નિરયાવલિ સૂત્ર
૧૨૧ કલ્યાણ મંદિર-લઘુશાંતિ સટીક
૧૨૨ ઉપદેશ સપ્તતિકા (ટીકાનુવાદ) પુસ્તક
૧૨૩ પ્રતિક્રમણ હેતુ (પુસ્તક)
૧૨૪ જૈન કુમારસંભવ મહાકાવ્ય
૧૨૫ દેવચંદ્ર સ્તવનાવલિ
૧૨૬ આનંદકાવ્ય મહોદધિ ભાગ-૧
૧૨૭ શ્રી પર્યંત આરાધના સૂત્ર (અવચૂરી અનુવાદ સાથે)

૧૨૮ જિનવાણી (તુલનાત્મકદર્શન વિચાર)
૧૨૯ પ્રશ્નોત્તર પ્રદીપ ગ્રંથ
૧૩૦ પ્રાચીન કોણ શ્વેતામ્બર કે દિગમ્બર (ગુજરાતી)
૧૩૧ જંબૂદ્વીપ સમાસ (અનુવાદ)
૧૩૨ સુમતિ ચરિત્ર (અનુવાદ)
૧૩૩ તત્ત્વામૃત (અનુવાદ)
૧૩૪ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ-૨
૧૩૫ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ-૧
૧૩૬ જૈન કથા સંગ્રહ ભાગ-૪ (પ્રતાકાર સંસ્કૃત)
૧૩૭ જૈન કથા સંગ્રહ ભાગ-૫
૧૩૮ જૈન કથા સંગ્રહ ભાગ-૬
૧૩૯ જૈન ધર્મ ભક્તિ કંચનમાળા (સાનુવાદ) ભાગ-૧
૧૪૦ જૈન ધર્મ ભક્તિ કંચનમાળા (સાનુવાદ) ભાગ-૨
૧૪૧ શ્રીમોક્ષપદ સોપાન (ચૌદ ગુણસ્થાનકનું સ્વરૂપ)
૧૪૨ રત્નશેખર રત્નવતી કથા (પર્વતિથિ માહાત્મ્ય પર)
૧૪૩ ષષ્ઠિશતકમ્ (સાનુવાદ)
૧૪૪ નમસ્કાર મહામંત્ર (નિબંધ)
૧૪૫ જૈન ગોત્ર સંગ્રહ (પ્રાચીન જૈન ઈતિહાસ સહિત)
૧૪૬ નયમાર્ગદર્શક યાને સાતનયનું સ્વરૂપ
૧૪૭ મહોપાધ્યાયશ્રી વીરવિજયજી મહારાજા ચરિત્ર
૧૪૮ મુક્તિ માર્ગદર્શન યાને ધર્મપ્રાપ્તિના હેતુઓ
૧૪૯ ચેતોદૂતમ્
૧૫૦ મૂર્તિમંડન પ્રશ્નોત્તર
૧૫૧ પિંડવિશુદ્ધિ અનુવાદ
૧૫૨ નંદિસૂત્ર (મૂળ)
૧૫૩ નંદિસૂત્ર સટીક (બીજી આવૃત્તિ)
૧૫૪ નંદિસૂત્ર ચૂર્ણિ સટીક
૧૫૫ અનુયોગ દ્વાર સટીક
૧૫૬ દશવૈકાલિક સટીક
૧૫૭ દશવૈકાલિક સટીક
૧૫૮ ઓઘનિર્યુક્તિ સટીક
૧૫૯ પિંડનિર્યુક્તિ
૧૬૦ આવશ્યક સૂત્રની ટીકા ભાગ-૧
૧૬૧ આવશ્યક સૂત્રની ટીકા ભાગ-૨

૧૬૨ આવશ્યક સૂત્રની ટીકા ભાગ-૩
૧૬૩ આવશ્યક સૂત્રની ટીકા ભાગ-૪
૧૬૪ આવશ્યક સૂત્રની ટીકા ભાગ-૧
૧૬૫ આવશ્યક સૂત્રની ટીકા ભાગ-૨
૧૬૬ આવશ્યક સૂત્રની ટીકા ભાગ-૩
૧૬૭ આવશ્યક સૂત્રની દીપિકા ભાગ-૧
૧૬૮ આવશ્યક સૂત્રની દીપિકા ભાગ-૨
૧૬૯ આવશ્યક સૂત્રની દીપિકા ભાગ-૩
૧૭૦ ઉત્તરાધ્યયન સટીક ભાગ-૧
૧૭૧ ઉત્તરાધ્યયન સટીક ભાગ-૨
૧૭૨ ઉત્તરાધ્યયન સટીક ભાગ-૩
૧૭૩ જંબુદ્વીપ પ્રજ્ઞપ્તિ ભાગ-૧
૧૭૪ જંબુદ્વીપ પ્રજ્ઞપ્તિ ભાગ-૨
૧૭૫ જીવાજીવાભિગમ સૂત્ર ભાગ-૧
૧૭૬ જીવાજીવાભિગમ સૂત્ર ભાગ-૨
૧૭૭ રાજપ્રશ્નીય
૧૭૮ આચારાંગ દીપિકા
૧૭૯ ભગવતી સૂત્ર ભાગ-૧
૧૮૦ ભગવતી સૂત્ર ભાગ-૨
૧૮૧ ભગવતી સૂત્ર ભાગ-૩
૧૮૨ પન્નવણા સૂત્ર સટીક ભાગ-૧
૧૮૩ પન્નવણા સૂત્ર સટીક ભાગ-૨
૧૮૪ ઋષિભાષિતસૂત્ર
૧૮૫ હારિભદ્રીય આવશ્યક ટીપ્પણક
૧૮૬ સૂર્યપ્રજ્ઞપ્તિ સટીક
૧૮૭ આચારાંગ દીપિકા ભાગ-૧
૧૮૮ સૂત્રકૃતાંગ દીપિકા
૧૮૯ ઠાણાંગ સટીક ભાગ-૧
૧૯૦ ઠાણાંગ સટીક ભાગ-૨
૧૯૧ અનુયોગદ્વાર મૂળ
૧૯૨ સમવાયાંગ સટીક
૧૯૩ આચારાંગ દીપિકા ભાગ-૨
૧૯૪ સૂત્રકૃતાંગ સટીક ભાગ-૧
૧૯૫ સૂત્રકૃતાંગ સટીક ભાગ-૨

૧૯૬ ભગવતી સૂત્ર
૧૯૭ કલ્પસૂત્ર પ્રદીપિકા
૧૯૮ કલ્પસૂત્ર કૌમુદિ
૧૯૯ આનંદ કાવ્ય મહોદધિ ભાગ-૩
૨૦૦ શ્રી શ્રુતજ્ઞાન અમીધારા
૨૦૧ ઉત્તરાધ્યયન સૂત્ર-મૂળ
૨૦૨ ઉપધાન વિધિ પ્રેરક વિધિ
૨૦૩ હીરસ્વાધ્યાય ભાગ-૧
૨૦૪ હીરસ્વાધ્યાય ભાગ-૨
૨૦૫ ચૈત્યવંદનાદિ ભાષ્યત્રયી (વિવેચન)
૨૦૬ ભોજપ્રબંધ
૨૦૭ શ્રી વસ્તુપાલ ચરિત્ર (ભાષાન્તર)
૨૦૮ શ્રી યોગબિંદુ સટીક
૨૦૯ ગુરુ ગુણ રત્નાકર કાવ્યમ્
૨૧૦ જગદ્ગુરુ કાવ્યમ્
૨૧૧ યોગદષ્ટિસમુચ્ચય (અનુવાદ)
૨૧૨ જૈન જ્યોતિર્ગ્રંથ સંગ્રહ
૨૧૩ પ્રમાણ પરિભાષા
૨૧૪ પ્રમેય રત્નકોષ
૨૧૫ જૈન સ્તોત્ર સંગ્રહ ભાગ-૨
૨૧૬ શ્રી યોગદષ્ટિસમુચ્ચય (ભાવાનુવાદ)
૨૧૭ નવસ્મરણ (ઈંગ્લીશ સાર્થ સાનુવાદ)
૨૧૮ આઠ દષ્ટિની સજ્ઝાય
૨૧૯ આગમસાર (દેવચંદ્રજી)
૨૨૦ નયચક્રસાર (દેવચંદ્રજી)
૨૨૧ ગુરુગુણષટ્ત્રિંશિકા (દેવચંદ્રજી)
૨૨૨ પંચકર્મગ્રંથ (દેવચંદ્રજી)
૨૨૩ વિચાર સાર (દેવચંદ્રજી)
૨૨૪ શ્રી પર્યુષણ પર્વાદિક પર્વોની કથાઓ
૨૨૫ વિમળ મંત્રીનો રાસ
૨૨૬ બૃહત્ સંગ્રહણી અંતર્ગત યંત્રોનો સંગ્રહ
૨૨૭ દમયંતી ચરિત્ર
૨૨૮ બૃહત્સંગ્રહણી યંત્ર
૨૨૯ જૈન સ્તોત્ર સંગ્રહ

ॐ नमोऽर्हद्भ्यः

श्रीक्षमाकल्याणकविरचितम्

# ॥ गद्यबद्ध-श्रीयशोधरचरित्रम् ॥

सकलसुरनरेन्द्रश्रेणिसंसेव्यमानात्, समजनि किल यस्माद् विश्वलोकव्यवस्था ।
हिमवत इव रम्या स्वर्गसिन्धुर्युगादौ, स जयतु जगदार्यो नाभिसूनुर्जिनेशः ॥ १ ॥
निखिलजनपदस्थं येन गर्भस्थितेनाऽप्रमितनिजमहिम्ना जन्यजातं निरस्तम् ।
उपकृतिमतिरक्तस्तीर्थकृद् भक्तिभाजः, स भवतु मम शान्तिर्दुष्टकर्मोपशान्त्यै ॥ २ ॥

विजित्य दुर्वारमनङ्गवीरं, जगाम योगीन्द्रशिरोमणित्वम् ।
यः शैशवादेव कृपापरीतं तमीश्वरं नेमिजिनं नमामि ॥ ३ ॥
यदीयसंपर्कवशादनुत्तरं, बभूव तीर्थं किल काशिजाह्नवी ।
स देवदेवः समतीर्थसत्तमः, सुपार्श्वपार्श्वाधिपतिः पुनातु माम् ॥ ४ ॥

योऽनिष्टदुष्टेष्वपि शिष्टभावात्, सुदृष्टिरासीत् स्वगुणैर्विशिष्टः ।
स वर्द्धमानो मम वर्द्धमानं, प्रयच्छतु स्वच्छमतुच्छबोधम् ॥ ५ ॥
जिनेन्द्रचन्द्राननपद्मसंभवा, स्याद्वादमार्गाश्रयिणी सरस्वती ।
मदीयचित्ते निरवद्यवृत्तिनि, करोतु संवासमुदारमात्मनः ॥ ६ ॥
प्रसादतः श्रीनिधिसद्गुरूणां, विशुद्धवैराग्यकरं मनोज्ञम् ।
समीक्ष्य राजर्षियशोधरस्य, वक्ष्ये चरित्रं सुतरां पवित्रम् ॥ ७ ॥

श्रीहरिभद्रमुनीन्द्रैर्विहितं प्राकृतमयं तथाऽन्यकृतम् । संस्कृतपद्यमयं तत् समस्ति यद्यपि चरित्रमिह ॥८॥
तदपि तयोर्विषमत्वादर्थावगमो हि तादृशो न भवेत् । तदहं गद्यमयं तत् कुर्वे सर्वाऽवबोधकृते ॥९॥ युग्मम् ।

इहाऽपारसंसारपारावारान्तर्गतेन भव्यात्मना कथमपि सुदुर्लभमनुष्यत्व-सुकुलोत्पत्ति-समग्रेन्द्रियादिसामग्रीसंप्राप्तिपूर्वकं सम्यग्दर्शनं संप्राप्य निश्शेषकर्मक्लेशोच्छित्तये सर्वदा त्रिजगद्वर्तिसमस्तजन्तुजातनिष्कारणाऽसाधारणोपकारपरायणश्रीजिनेन्द्रोपदिष्टविशिष्टनिःसपत्नरत्नोपमसद्धर्मकर्माचरणे प्रयत्नो विधेयः, न पुनः क्षणमपि अनेकाऽनर्थसार्थाऽव्यभिचारिमहाऽरिप्रमादसमुदायं प्रति स्वस्मिन् निवासः प्रदेयः । यदि पुनः तथाविधकर्मोदयात् सर्वदाऽप्रमत्ततया धर्मकरणेऽसामर्थ्यम्; तथापि अष्टाहिकादिपर्ववासरेषु तु अवश्यमे-

वाऽप्रमादेन धर्मकर्म आचरणीयम्, जीवहिंसाद्यकृत्यं च परिवर्जनीयम्। तत्र अष्टाह्निकाः षट् शाश्वत्यः, अन्यास्तु अशाश्वत्यः। तथाहि—

"दो[1] सासयजत्ताओ तत्थेगा होइ चित्तमासम्मि। अट्ठाहियाउ महिमा बीया खलु अस्सिणे मासे ॥ १ ॥
एया उ दो वि सासयजत्ताओ करन्ति सव्वदेवा वि। नंदीसरम्मि विज्जाहरा नरा निययठाणेसु ॥ २ ॥
तह चउमासियतियगे पज्जोसवणाइ तह य इय छक्कं। जिणजम्म-दिक्ख-केवल-निव्वाणाइसु असासईया" ॥ ३ ॥

अयमर्थः—एका चैत्रमासे शाश्वती अष्टाह्निका, द्वितीया आश्विने मासे, एवं द्वे शाश्वत्यौ—सर्वदा भवत इत्यर्थः। तथा चातुर्मासिकत्रिके आषाढादिके तिस्रः, तथैव पर्युषणापर्वणि एका, इत्येताश्चतस्रोऽन्या अष्टाह्निकाः शाश्वत्यः, एवं च षड् भवन्तीत्यर्थः। तथा जिनजन्म-दीक्षा-केवल-निर्वाणकल्याणकादिषु या अष्टाह्निकास्ता अशाश्वत्यः—यदैव श्रीमतामर्हतां जन्मादिकल्याणकानि स्युस्तदैव ता भवन्तीत्यर्थः। एतेषु हि अष्टाह्निकोत्सवेषु प्रायः सुरेन्द्राः प्रचुरतरसुरनिकरपरिवृता नन्दीश्वरद्वीपं गत्वा अष्टौ दिनानि यावत्

---

१ द्वे शाश्वतयात्रे तत्रैका भवति चैत्रमासे। अष्टाहिका महिमा द्वितीया खलु आश्विने मासे ॥ १ ॥
एते तु द्वे अपि शाश्वतयात्रे कुर्वन्ति सर्वदेवा अपि। नन्दीश्वरे विद्याधरा नरा निजकस्थानेषु ॥ २ ॥
तथा चातुर्मासिकत्रिके पर्युषणायां तथा च इति षट्कम्। जिनजन्म-दीक्षा-केवल-निर्वाणादिषु अशाश्वतिकाः ॥ ३ ॥

शाश्वतजिनस्नात्र-पूजादिविविधभक्तिकरणेन निजं जन्म सफलीकुर्वन्तीति। अथैतासां मध्ये चैत्रा-ऽऽश्विनयोर्ये अष्टाहिके तयोर्विषये ये केचिद् महामिथ्यात्वोपहतान्तःकरणशुद्धयो दुर्बुद्धय आसन्नदुर्गतिका गतानुगतिका लोकाः, ते तु मूढाः पापेनैव पुण्यफलमिच्छन्तः प्रायो दुष्टव्यन्तरदेवताराधनकृते निरपराधानाम् अज-महिषादिजन्तूनां वधे प्रवर्तन्ते। यदुक्तम्—

दुःखप्रतिक्रियार्थं सुखाऽभिलाषाच्च पुनरपि तु जीवः। प्राणिवधादीन् दोषानधितिष्ठति मोहसंछन्नः॥ १॥
बध्नाति ततो बहुविधमन्यत् पुनरपि नवं सुबहुकर्म। तेनाथ पच्यते पुनरग्नेरग्निं प्रविश्येव"॥ २॥

ये तु सम्यग्दर्शनाद् अवाप्तशुद्धबुद्धयो भव्यलोकाः, ते किल स्पष्टतया हिंसाविपाकप्रदर्शकम् अष्टभवसंबद्धं श्रीयशोधरनरेन्द्रस्य चरित्रं श्रुत्वा मनसाऽपि हिंसामयं कृत्यं नाऽभिलषन्ति, किन्तु सर्वसत्त्वेषु करुणाबुद्धिं दधानाः कामपि अबाधामनुत्पादयन्त एकाग्रमनसा श्रीमदर्हत्-सिद्धा-ऽऽचार्यो-पाध्याय-साधु-दर्शन-ज्ञान-चारित्र-तपःस्वरूपपरमतत्त्वाराधनां कुर्वन्ति, यस्माद् इह परत्र च मनोऽभीष्टसम्पत्-परमानन्दपदप्राप्तिः अप्रयासेनोपजायते इति। इति पीठिका॥

अथ श्रीसुधर्मस्वामिपरम्परायातं सदाऽवदातं जीववधादिकुमतिलतालवित्रं परमपवित्रं श्रीयशोधरनरेन्द्रचरित्रं प्रोच्यते। तच्च भव्यात्मभिः प्रमादपरिहारेण सावधानीभूय श्रोतव्यम्—

# श्रीयशोधरचरित्रप्रारम्भः

अस्मिन् जम्बूद्वीपे भरतक्षेत्रे विविधसम्पद्विभूषितसर्वप्रदेशे मगधदेशे प्रवरतरं राजपुरं नाम नगरमासीत्। तत्र महामिथ्यात्वमोहितमतिः सुदुष्टपरिणतिः पञ्चेन्द्रियविषयासक्तः कौलमतभक्तो मारिदत्तनामा राजा बभूव। स च अनादिभवाऽभ्यस्तमिथ्यात्वोदयाद् महाकुमार्गपतितः सन् त्रिजगदीश्वरं जिनेश्वरं कदापि स्वप्नेऽपि न जानाति स्म। तस्य राज्ञश्चण्डमारिरिति नाम्ना व्यन्तरी कुलदेवी अभूत्। साऽपि महामिथ्यादृष्टितयाऽतीव दुष्टा, अत एव च धर्मिष्ठप्राणिनाम् अनिष्टाः समजनिष्ट। तथा तस्य नगरस्य पार्श्वतो दक्षिणदिग्भागे तस्या एव देव्या एकं महद् मन्दिरमासीत्। तत्स्वरूपं यथा—यत्र महिषीशृङ्गाणां तु तोरणानि आसन्, भारण्डपक्षिणोऽण्डकाः कलशस्थाने बभूवुः, एकं महद् अस्थिखण्डं दण्डस्थाने तस्थौ, व्याघ्रपुच्छस्य ध्वजोऽभूत्, गजचर्मणश्चन्द्रोदयो बभौ, गजदन्तानामेव स्तम्भा आसन्, कपर्दकैर्जटितम् अङ्गणं शोभते स्म। तथा, शङ्खचूर्णेन यद् धवलितम्, रुधिरच्छटाभिश्च अरुणीकृतमासीत्। पुनः, जीवानां दन्त-जिह्वाद्यवयवा एव यत्र पुष्प-पल्लवप्रकरस्थाने बभूवुरिति। तस्मिन् एवंविधविकरालरूपधरे तस्याश्चण्डिकाया विरूपाकृतिरिव मूर्तिरासीत्। सा च एकस्मिन् हस्ते कर्त्तिकां नर्तयन्ती, अन्यस्मिन् पुनर्भयङ्करं मुद्गरं धारयन्ती,

कूपगल्लं दीर्घदन्तं रक्त-वर्तुललोचनं च मुखं बिभ्रती, सर्वेषां कातरनराणां दर्शनमात्रेणैव भयोत्पादिका बभूव । पुनस्तस्या देव्याः प्रतिदिनम् अतिदुर्गन्धया मदिरया स्नपनं क्रियते स्म, अर्क-धत्तूर-कणवीरादिपुष्पैश्च पूजनं विधीयते स्म तद्भक्तलोकैः । अथैकदा सदैव अभक्ष्यभक्षणा-ऽपेयपाना-ऽगम्यगमनतत्परैः महापापैः कौललोकैर्मारिदत्तायोक्तम्–'अहो कौलकुलमण्डन! दुर्दान्तरिपुदलखण्डन! निजतेजोनिर्जितभास्कर! श्रीमारिदत्तनरेश्वर! स्वदेशे शान्तिकनिमित्तं महताऽऽडम्बरेण देव्याराधनं विधीयताम्' । तदा तैर्दुष्टैः इत्थं प्रेरितः स नरेन्द्रोऽपि तन्मयत्वात् तद्वचने प्रत्ययमावहन् अतीवहिंसामयं देवीपूजनोत्सवं कर्तुमारब्धवान् । अथ तस्मिन् देव्या महोत्सवे नवमीदिवसागमे रुधिरपानकारिका मांसभक्षिका अनाचारासक्ता बह्वयो डाकिनी-शाकिनीप्रमुखा योगिन्यः संभूय नृत्यन्ति स्म । पुनः, कामविडम्बिता दुष्टचेतसः कौलास्तत्रागत्य किलकिलारावं कुर्वाणाः शृङ्गिकाः पूरयामासुः । एवं तेषां दुरात्मनामुत्सवे प्राप्ते सति देवीपूजने उत्सुकः सन् सद्यः प्रतिदिशं सेवकान् संप्रेष्य जलचर-स्थलचर-खेचरजीवानाम् एकलक्षं मिथुनानि आनाययामास । ते च जीवा अमी—

शफर-कच्छप-दर्दुर-राजिला, मकर-रोहित-मीन-जलौकसः । दशपदा जलवायस-पूतराः, परिसमादधिरे जलचारिणः ॥१॥

हरिण-शम्बर-सूकर-चित्रकाः, शशक-सल्लक-रासभ-दन्तिनः ।
शरट-जम्बूक-वानर-मूषकाः, स्थलचराः शतशः परिकल्पिताः ॥ २ ॥

शुक-चकोर-रथाङ्ग-कपिञ्जलाः, कुरर-काक-कपोत-कलापिनः ।
कुकर-हंस-बकाः कुकवाकवः, प्रगुणिता मिथुनानि विहङ्गमाः ॥ ३ ॥

तदा एकत्रकृतैर्बहुभिर्जलचरादिजीवानां मिथुनैर्मरणभयात् फूत्कुर्वाणैः तद्गृहभूमिर्नरकभूमिरिव भयङ्करा बभूव । ततः कौलप्रेरितेन राज्ञा स्वसेवकानाकार्य पुनः प्रोक्तम्—"भो भोः! श्रूयताम्, यावद् बहुगुण-युक्तं षोडशवार्षिकं कोमलपुद्गलं स्त्री-पुरुषयुगलं न लभ्यते तावद् अखण्डपूजाविधिर्न भवति, तस्माद् यूयं शीघ्रं व्रजत, एतन्नगरस्य मध्यदेशे बहिर्देशे वा किञ्चित् तादृशं नरमिथुनं विलोक्य सत्वरमिहाऽऽनयत। ततो बहवः सेवकलोका एतद् नृपवचः श्रुत्वा तद् विलोकयितुं समग्रेऽपि नगरे प्रतिमार्गं भ्रमन्ति स्म" ।

अथ एवंविधे तत्राऽतीवभयङ्करे व्यतिकरे प्रवर्तमाने सति कुतश्चिद् दैवयोगाद् बहुभिस्तपोधनैः परिवृतः परमसंवृतः सदा सुदृष्टिर्युगमात्रभूमिस्थापितदृष्टिर्महोपयोगी परमयोगी अद्भुतज्ञान-तपस्तेजोभिर्भास्करो भव्य-जनमनःकुमुदाह्लादने राकानिशाकर एवंविधः श्रीसुदत्तनामा गणधरस्तं बहुजीवानाम् अकस्मात् समुत्पन्नं महाघोरमुपद्रवं दूरीकर्तुमिव तन्नगरोद्याने समाजगाम, परं स्वयम् अतीव विरक्तचित्तत्वाद् बहुलविमल-दल-सुरभिकुसुम-फलपटलपेशलबहलतरुगणसंशोभिते विहितझङ्कारारावभ्रमरादिविविधजीवकुलाश्रिते पञ्चे-न्द्रियानन्ददायके तस्मिन् वने स्थातुम् अनिच्छन् सर्वसाधुभिः सह ततो निःसृत्य तत्पार्श्ववर्तिनि श्मशाने निरवद्यभूमौ तस्थिवान् । ततो भ्रातृ-भगिनीसम्बन्धयुक्तं शिष्ययुगलं सुदत्तगुरोराज्ञां गृहीत्वा अष्टमतपसः

पारणके आहारग्रहणार्थं नगराऽभ्यन्तरे समागमत्। तदा तैर्नृमिथुनं गवेषयद्भिर्नृपसेवकैः तद् यथोक्तस्वरूपं नरयुगलं विलोक्य अतीव विस्मयं प्राप्तैर्हठाद् निरुध्य चौरवद् भुजयोर्गाढं गृह्यते स्म। तस्मिन् अवसरे बालकमात्रोऽपि बुद्धिनिधिः अभयरुचिनामा शिष्यः स्वभगिनीम् अभयमतीं नाम साध्वीं दीनमुखीं दृष्ट्वा स्वयं धैर्यमवलम्ब्य एवमवादीत्—'हे तपस्विनि भगिनि महाभागे! एभिर्दुष्टपुरुषैः पीड्यमाना त्वं भयं मा प्राप्नुहि, यतो दुर्दैवो देहिनां भयं न जानाति। अतो हे भगिनि! मृत्युभयं मुञ्च, एकं श्रीवीतरागमेव च हृदि स्मर; यत्स्मरणमात्रेणैव प्राणिनां सर्व्वापदुच्छेदः संपद्यते। किञ्च, अधुना आवयोरयं मृत्युकालः संप्राप्तः, स खलु साधनीयः, अन्या कापि चिन्ता न कार्या। यत आत्मनो ज्ञातं मरणं भाग्यैरेव भवेत्। अन्यच्च, यत्पुनरधुना मृत्युसमये आवयोः पारणं न जातं तत्तु सम्यक्, परं यद् गुरुर्न पृष्टस्तद् ममातीव संतापो जायते। यतस्तस्य गुरोर्भगवतो निर्ममत्वस्यापि आवयोः शोकतप्तस्य सद्ध्यानतपोविघ्नं भविष्यतीति'। पुनरपि धैर्यमाश्रित्य परिणामशुद्ध्यर्थं भगिनीं प्रति मुनिर्जगाद—

"अहमस्मि न ते कश्चिद् न त्वं भवसि कापि मे। परलोकजुषां भिन्नाः पन्थानो येन देहिनाम् ॥ १ ॥
नमोऽस्तु गुरवे तस्मै नमो देवाय चार्हते ॥ नमोऽस्तु सर्वसिद्धेभ्यो धर्माय च नमो नमः ॥ २ ॥
शरणं ते ममार्हन्तः सिद्धाश्च शरणं मम। शरणं साधवः सर्वे धर्म्मश्च शरणं मम" ॥ ३ ॥

पुनर्मुनिरूचे—'हे भगिनि! निरपराधानां पीडनेऽमर्षस्तु आयाति, परं परित्यक्तशस्त्राणां साधूनां सोऽपि

कर्तुं न घटते । इदानीं पुनर्यदि मम तपस्तेजोमयः कोपाग्निर्दीप्यते तर्हि तस्य एतद् जगत्त्रयं प्रथमाऽप्या-हुतिर्न भवेत् । परम् अहं पापाद् बिभ्यत् क्षमामेव समीचीनां जानामि । यदुक्तम्—

"कः क्षमेत सुधीस्तर्हि न्याय्ये कोपस्य कारणे । यदि नैककृतं पापं कोटिधा परिपच्यते"? ॥ १ ॥

इत्थं तेन भ्रातृसाधुना आश्वास्यमाना सा बाला तपस्विनी साध्वी स्वकीयं नयनद्वयं प्रमृज्य गद्गदस्वरेण जगाद—"हे बान्धव ! अहं तव पराक्रमं जानामि, तव दुष्करं तपोऽपि वेद्मि, परं दीनायां मयि करुणा तव युज्यते । पुनर्भो बान्धव ! अहं मरणभयाद् न विलपामि, किन्तु अजादिपशुवत् शस्त्रप्रहारेण आवयो-र्मृत्युरागतोऽस्ति अतो विह्वला भवामि । तथा शोक-मोहादयो वैरिणः परित्यक्ता अपि माम् अनाथां पुनः पुनः स्पृशन्ति, किं करोम्यहम् ? । अथवाऽलं विषादेन, येन प्राणिना यादृशं शुभाऽशुभं कर्म्मोपार्जितं तस्य तदनुभवतोऽनृणीभवनात् प्रत्युत हर्षो जायते, अतोऽहमधुना शोकं न करिष्ये । हे योगीन्द्र ! हे बान्धव! एवंविधे प्रस्तावे त्वयाऽहं सम्यग् बोधिता" । अथ राजपुरुषैर्गृह्यमाणयोस्तयोर्भ्रात्रोरेवंविधा गम्भीरकरु-णावाचः सर्वैरपि पौरलोकैः शुश्रुविरे । पुनस्तस्मिन् अवसरे तत्र एतादृगुपद्रवः प्रादुर्भूतः । तथाहि—अकस्माद् भूमिश्चकम्पे, रजोभिर्नभस्तलं व्याप्तम्, वायुरपि संभ्रान्त इव निश्चलः संजातः, सूर्यमण्डलं च राहुग्रस्तमिवा-ऽऽकुलं दृश्यते, वृक्षादयोऽपि चकिता इव प्रायो निश्चला अभवन् । अथ तस्मिन् प्रस्तावे तं व्यतिकरं विलोक्य

---

१ भ्रातृ-भगिन्योः ।

पौरलोकाः सर्व्वेऽपि हाहारवं कुर्वन्तो मुखेऽङ्गुलीं प्रक्षिपन्तो राजानमुद्दिश्य एवमूचुः—'हा दुष्ट पापिष्ठ निकृष्ट निष्करुण महानास्तिक स्त्री-बाल-वृद्ध-पशुघातक कौलमतभक्त पापासक्त मारिदत्त ! अस्माकमभाग्यैस्त्वं भूपतिर्जातः । हा ! हता वयं, किं कुर्म्मः ?, कुत्र यामः' ? । इत्थं बहुविधाऽऽक्रोशवाग्भिः क्रोधात् पौरलोकेषु समन्तात् कथयत्सु सत्सु तै राजपुरुषैस्तच्छिष्ययुगलं राज्ञोऽग्रे मुक्तम् । तदा साधुतपःप्रभावाद् दशापि दिशो नीली-कज्जल-निबिडकर्दमैरत्यर्थं लिप्ता इव अकस्मात् विच्छायरूपाः संजाताः । तथा सर्वेऽपि कौला योगिन्यश्च पुनः पुनः क्षोभं प्रापुः, दुष्टमन्त्रिणश्च जीवितव्याऽशारहिता बभूवुः । स मारिदत्तभूपालोऽपि करुणा-कौतुक-जडत्व-लज्जामिश्रितदृष्ट्या मुनियुगलं विलोकयन् मनसि एवं चिन्तयामास—"इदं हि दिव्यरूपधरं युगलं महाश्चर्यकारि अस्माकमदृष्टपूर्वम् अकस्मादिह कुतः समागतम् ? । पुनरेतद् मम सामान्यं न प्रतिभासते, यतोऽनयोः शान्तकान्तिमयमूर्त्ते रमणीयतरवयसश्च विलोकनात् मम चिरपरिचितमपि निर्दयत्वम् अद्य सद्यः प्रणष्टम्, चेतसि कोमलत्वं च समुत्पन्नम् । पुनरयं सर्वगुणाधारः कुमारः सुविशाललोचनो दुर्मतिमदमोचनो वृषभस्कन्धः प्रचण्डभुजदण्डः कार्तिकेयवद् ब्रह्मचारी दुश्चरतपोधारी सूर्य इव स्वतेजसा अस्मान् सर्वानपि आच्छादयति । अथ यद्येष दुर्वारवीर्यो महामुनिः कथमपि कोपं कुर्यात् तदाऽयं निर्दयकौल-योगिन्यादियुक्तोऽस्माकं देवीपूजनोत्सवः सर्वोऽपि उपद्रवप्रायो भवेत् । तथा इयं स्वर्णवर्णशरीरा केतकीदलविमलविशालनयना पूर्णचन्द्रवदना तपस्विनी मदमदनविरहिता शान्ता

दान्ताऽपि अस्माकं मनसि भयमुत्पादयति" । अथैवं विचिन्त्य स राजा आश्चर्ययुक्तः सन् मधुरवाण्या उवाच–"अहो ! द्वावपि परस्परं स्नेहवन्तौ शरीरेण वयसा च तुल्यौ महाव्रतधरौ धीरौ स्त्री-पुरुषरूपौ कुमारौ यमकिङ्करैरिव मत्सेवकैर्गृहीतौ दुर्दैवप्रेरितौ राक्षसरूपस्य मम नगरं प्राप्तौ भवन्तौ कौ स्तः ?, स्वस्वरूपं वदताम् । पुनर्बाल्ये एव युवाभ्यामिदं दुस्तरं तपः किमर्थमारब्धम् ?, तद् वदताम् । मम चित्तेऽत्यर्थं कौतुकमस्ति । पुनर्ममेदं हृदयं धैर्यवतोर्भवतोर्लावण्यं विलोक्य अतीवाऽऽनन्दति । अतोऽहं तावद् युवयोर्बालतपस्विनोर्नाम श्रोतुमिच्छामि । युवाभ्यां न भेतव्यम्, प्रसादं कृत्वा इहोपविश्यताम्" । इत्थं स्वकीयाऽर्द्धासनदानेन राज्ञा स्वागते क्रियमाणेऽपि कुसङ्गतिभयात् तयोर्मनो न मन्यते स्म । तथापि कुमारो दिक्षु दृष्टिं प्रसारयन् तादृशीं जीवानां दुर्दशां पश्यन् जीवदयादिलाभं विज्ञाय तत्रोचितस्थाने उपविश्य मारिदत्तभूपं प्रति उवाच–'हे महाराज ! तव नामादिप्रश्नस्य कौतुकं युक्तमेव । यतः सामान्यच्छद्मस्थजनः स्वयं किमपि कार्यं न जानाति, पुरुषान्तरमुखाच्छ्रुत्वैव जानाति । परं भवे भवे नवनवयोनिषु उत्पत्तिमतां जीवानामेकमेव नाम-गोत्रादिकं किमपि नास्ति यन्निर्द्धार्य उच्यते । पुनर्भो राजन् ! मम नाम अजानतस्तव किं कार्यम् असिद्धमस्ति, अन्येऽपि एते वराका जल-स्थल-नभश्चरा बहवो जीवा हननार्थं त्वया संगृहीताः सन्ति तेषां मध्ये त्वं केषां केषां नाम जानासि ? । यदि पुनर्लोकाचारेण पृच्छसि तर्हि लोकोत्तराचारस्थितस्य राज्ञि रङ्के च समचेतसो ममापि वक्तुं योग्यता नास्ति । तथा यत् त्वया तपसः कारणं पृष्टं तदपि श्रोतुं तव नाय-

मवसरो विद्यते, यतोऽमी द्रव्य-क्षेत्र-काल-भावाः सर्वेऽपि धर्मगोष्ठीविरोधिनोऽयुक्ता एव मिलिताः सन्ति । तथाहि—एकस्यां दिशि दुर्गन्धमदिरापूरितानि मद्यभाण्डानि सन्ति, अन्यस्यां दिशि मांसराशिर्विद्यते, क्वचित् प्रदेशेऽत्र मूर्च्छिता भीता दीनलोचना अमी प्राणिनः कण्ठशोषेण तालुमग्नया जिह्वया निजदुःखमनुक्त्वैव प्राणान् त्यजन्ति । क्वचित् प्रदेशे पुनरेते रज्वादिभिर्बद्धदेहाः स्वभाषाविशेषैर्विरसं पूत्कुर्वन्तः क्षुधा-पिपासादि-विविधव्यथामनुभवन्तो दीनदृष्ट्या भवन्तं पश्यन्ति, अन्तर्निन्दन्ति चेति । अपि च, भो राजन् ! सर्वेऽपि संसारिणो जीवाः सुखाऽभिलाषिणो दुःखद्वेषिणश्च सन्ति, इदं हि तवापि स्वानुभवसिद्धं वर्तते, ततस्त्वं कथं निरपराधानाममीषां प्राणिनां वधं करोषि ? । यो हि प्राणी शस्त्रवर्जितो युद्धपराङ्मुखो दन्तैश्च सर्वदा तृणं गृह्णाति तस्य हनने कदापि वीरत्वं नोच्यते, किन्तु नीचत्वमेव लोके प्रादुर्भवति । अथवा बहु किमुच्यते ?, अहो ! अराजकमिदं जगत्, न हि अत्र कोऽपि कस्यापि शरणमस्ति, अन्यथा बलवद्भिर्मूर्खैर्दुर्बलाः पशवः कथं हन्यन्ते ? । अन्यच्च, ये प्राणिनो धर्मार्थं पशून् घ्नन्ति ते महामूर्खा जीवितार्थं विषं भक्षयन्ति, देहशैतल्यार्थं च वह्नौ प्रविशन्ति, यतो जीवघातेन कदापि शान्तिर्न भवति । यदुक्तम्—

"अहो नु खलु नास्त्येव जीवघातेनं शान्तिकम् । मूढवैद्यप्रयुक्तेन कुपथ्येनेव पाटवम् ॥ १ ॥
अशान्तिं प्राणिनां कृत्वा कः स्वशान्तिकमिच्छति ? । इभ्यानां लवणं दत्त्वा किं कर्पूरं किलाप्यते ? ॥ २ ॥
यो हि रक्षति भूतानि भूतानामभयप्रदः । भवे भवे तस्य रक्षा यद् दत्तं तदवाप्यते" ॥ ३ ॥

"पुनर्भो राजन् ! कुबोधबीजादुत्पन्नस्य अस्य हिंसातरोरिहभवे परभवे च बहुविधरोगा-ऽल्पजीवित-पङ्गुलत्व-कुब्जत्व-कुष्ठित्वा-ऽन्धत्व-कुरूपत्व-दुर्गतिगमनादीनि कटुकविपाकान्येव फलानि प्रादुर्भवन्ति । तस्माद् ये प्राणिनश्चिन्तामणितुल्यं दयाधर्मं परित्यज्य काचखण्डतुल्यां हिंसाम् अङ्गीकुर्वन्ति ज्ञातं तेषां पण्डितत्वम् !। ते हि सर्वमूर्खशिरोमणय एव ज्ञानिभिरुच्यन्ते। पुनर्येषां प्राणिनां पिशाचा देवबुद्ध्या पूज्याः सन्ति, गुरवश्च कौला विद्यन्ते, हिंसा च धर्मोऽस्ति, पञ्चेन्द्रियविषयाश्च मोक्षो वर्तते, तैः सुदुर्लभं प्राप्तं मनुष्यजन्म वृथैव हारितम्। पुनर्भो नृपते ! शृणु—स्वस्य विघ्ननाशाय पशुमांसैर्देवीपूजां कृत्वा योगिनीचक्रं संतर्प्य च कोऽपि नरः पूर्वकालेऽजरामरो भूतो भवेत् तर्हि कथय। पुनर्येऽमी हरि-हरिश्चन्द्र-राम-पाण्डवादयो महान्तो राजानो बभूवुस्ते किं योगिनीचक्रैस्तादृशा विहिताः ?, त्वं स्वचेतसि चिन्तय, मा वृथा भ्रान्तो भव । तथा अमी दुर्बला जन्तवस्त्वया मत्तेन बद्धाः सन्ति, एतेषां प्राणनाशेन त्वं स्वप्राणरक्षणमिच्छसि; अहो दुराचारता भवतः !। पुरा तु किल एवंविधाः शिष्टाचारधरा राजानो बभूवुर्यैः परप्राणरक्षार्थं स्वप्राणा अपि समर्पिताः । यदुक्तम्—

"शिबिः पारापतं त्रातुं सर्पं जीमूतवाहनः । आत्मनो देहमपि हि तुलायामध्यरोपयत्" ॥ १ ॥

"अथाऽलं बहुकथनेन । हे राजन् ! यतो ममानुपूर्वमेव एतेषां सर्वेषां जीवानां वधः समागतोऽस्ति, ततोऽमीषां पातकेनैव अहं तपस्वितां प्राप्तोऽस्मि, एतदेव भवत्प्रश्नस्योत्तरम् । तथा हे निर्दय! शास्त्रेषु कुबुद्धयो

नराः सतामनादरणीया एव उक्ताः सन्ति, अतः पाषाणमिव कठोरचित्तं भवन्तं नाऽहं निषेद्धुमिच्छामि। यदि पुनः पालके स्कन्दाचार्यवद् अहं त्वयि क्रुद्धो भवेयं तर्हि त्वं पुत्र-बान्धवादिसहितो भस्मीभूतः सन् क्षणमपि न जीवेः। परम् अहं स्वकीयप्राग्भवं स्मरन् हिंसातोऽतीव बिभेमि। यतः प्राग्भवे मया स्वल्पमात्रा हिंसा कृताऽभूत्, तद्विपाकात् सप्त भवान्तराण्यहं भ्रान्तः। तेषु च सर्वेष्वपि भवेषु पदे पदे शस्त्रादिभिः खण्ड्यमान आर्तध्यानपरो महादुःखी संजातः। पुनस्तत्र यद् यद् अकृत्यं, यद् यद् अज्ञानं, यद् यद् दुःखं, यद् यच्च मरणम् अहम् अन्वभूवम् तद् वाचा वक्तुमशक्यम्। ज्ञानिन एव तत्स्वरूपं जानन्ति। अहो! अल्पाया अपि हिंसाया ममेदृग् विपाकः संपन्नः, त्वं तु ईदृशः पापीयान् निर्दयः सन् बहुजीवान् विनाशयसि, अतो न जानेऽहं तव वराकस्य का गतिर्भविष्यति ?। किञ्च, केऽपि जीवाः कर्मणां फलं श्रुत्वा दुष्कर्मतो निवर्त्तन्ते, केऽपि कर्मविपाकं दृष्ट्वा वैराग्येण निवर्तन्ते, अहं पुनः कर्मफलं साक्षाद् अनुभूय निवृत्तोऽस्मि। यतोऽहं राजवंशे समुत्पन्नः पराक्रमी भोगलम्पटश्च अभूवम्, परं जातिस्मरणं प्राप्य प्रागनुभूतां कर्मचेष्टाम् अतिभीमां विलोक्य तरुण एव सन् तपसि स्थितोऽस्मि। मया तु पुरा जीवघातवृक्षस्य फलं प्राप्तम्, अथ त्वं पुनः किं दुष्प्रापं वस्तु प्राप्तुं अस्मिन् दुष्टे कार्ये श्रमं करोषि?। भवन्तं ज्वलदङ्गारगङ्गाम् अवगाहमानम् उद्भ्रान्तं विलोक्य पुराऽनुभूतानि तीव्रदुःखानि अहं पुनः स्मरामि"। इत्युक्त्वा तस्मिन् मुनीश्वरे मौनेन स्थिते सति स मारिदत्तभूपालो भयाकुलः सन् शीतार्त इव कम्पते स्म। तस्मिन्नवसरे तस्य राज्ञो महामोहे

क्षयं गते सति हृदि प्रबोधोऽपि निवासं चकार । ततोऽसौ भूमिलग्नेन मस्तकेन तं मुनीश्वरं नत्वा विनीतः सन् करद्वयं संयोज्य उवाच—

"एवमेव यथार्थत्वं भो मुने ! हर्षितोऽस्म्यहम् । तदहं श्रोतुमिच्छामि धर्मं ते जिनभाषितम् ॥ १ ॥
पक्ष-हेतुसमायुक्तैर्दृष्टान्ता-ऽऽगमशोभितैः । प्रदीपकलिकाशुद्धैर्बुद्धोऽहं वचनैस्तव ॥ २ ॥
तदाख्याहि तथाभूतं स्वधर्मं मुनिपुङ्गव ! । वपुषैव मया ज्ञातो यथा त्वं नृपनन्दनः ॥ ३ ॥
कथं कृता त्वया हिंसा कथं भ्रान्तो भवान्तरे ? । कथं कुमरणं प्राप्तं खण्डितस्त्वं पदे पदे ? ॥ ४ ॥
कथं च जातिस्मरणं कथं भोगाश्च वर्जिताः ? । कथं विधीयते धर्मः कथं मुक्तिरवाप्यते ? ॥ ५ ॥
सर्वमेतद् विनीतस्य ममाख्याहि तपोधन ! । नोपहासाय पृच्छामि अन्यथा शपथा मम" ॥ ६ ॥

इत्थं तेन राज्ञा उक्ते सति पुनर्मुनिरूचे—"भो राजन् ! अधुना क्षणमात्रेणैव त्वं कथं विनीतो जातोऽसि ? । इदं तव क्षणिकं मर्कटवैराग्यं वर्त्तते । अस्थिरचित्तस्य तव पुरः किं कथ्यते ?, यतोऽज्ञानिनां पुरो विशिष्टधर्मकथनं निरर्थकमेव, अरण्ये रोदनादिवत् । यदुक्तम्—

"रुदितमिदमरण्ये खण्डनं तत् तुषाणां, नभसि नियतमेते निष्ठुरा मुष्टिघाताः ।
मृतकवपुषि पूजा मण्डनं चाऽन्धवक्त्रे, यदविबुधजनानामग्रतो धर्मवादः" ॥ १ ॥

"तस्माद् हे राजन् ! धर्मादिप्रश्नाद् निवर्त्तस्व, किम् अस्माकं वृथा श्रमेण ? । सुखेन भोगान् भुङ्क्ष्व" ।

इत्थं मुनीन्द्रेणोक्ते सति स भूपो भ्रमर इव मुनिचरणकमलयोर्निपत्य अत्यादरेणोवाच–'हे प्रभो! मयि करुणार्द्रं चित्तं विधाय शीघ्रम् एतद् वृत्तान्तं कथय, मा विलम्बं कुरु। मम बोधिबीजं देहि'। ततः स मुनीन्द्रस्तां सभाम् अतीवोत्कण्ठितां विलोक्य राजानं च सरलीभूतं दृष्ट्वा स्वयम् अवसरं जानन् राजादीनां बोधिबीजोत्पत्त्यर्थं सजलजलधरध्वनिवद् धीरमधुरस्वरेण कथयामास–'हे राजन्! तव चित्ते यदि आन्तरप्रीत्या श्रवणेच्छा विद्यते तर्हि प्रबोधार्थं अन्यवार्त्ताभिः सृतम्!, किन्तु यद् मया एव प्रतिभवं साक्षाद् अनुभूतं तदेव चरित्रं सावधानतया शृणु–तत्र तावद् मम पूर्वभवा अमी—

"मयूरो नकुलो मीनो मेषो मेषश्च कुक्कुटः। निहत्य कुर्कुटं पैष्टं पापाद् राजा बभूव सः" ॥ १ ॥

स इति मम जीवो यशोधरनामा इत्यर्थः। अस्या मद्भगिन्याः पूर्वभवास्तु अमी—

"श्वा सर्प्पः शिशुमारश्च अजा महिषः कुर्कुटी। निहत्य कुर्कुटं पैष्टं पापाद् माता बभूव सा" ॥ २ ॥

सा इति यशोधरस्य माता चन्द्रमतीत्यर्थः। अथ विस्तरत एतद् वृत्तान्तम् इत्थम्—

## ॥ अथ प्रथमो भवः ॥

श्रीमति अवन्तिदेशे विविधधन-धान्य-समृद्धिपूरिता उत्तुङ्गतोरण-स्तम्भशोभितश्रीजिनमन्दिरमण्डिता

लघुघण्टिकारणत्कृतिसंयुतपताकाविराजितप्रचुरतरकोटीश्वरमन्दिरमालाविभ्राजिता उद्यान-वन-वापी-कूप-सरः-प्राकार-खातिका-दुर्ग-प्रतोलीपरिवेष्टिता सर्वसौख्यभृता सर्वधर्मयुता विशाला नामतः प्रसिद्धा अतिवृद्धा उज्जयिनी नाम नगरी आसीत्। कुलक्रमाऽऽगतायां तस्यां नगर्यां महोजस्वी तेजस्वी धैर्यौदार्यादि-सर्वगुणसंपूर्णः शुद्धवंश्यो मनोज्ञाकारधरो भोगपुरन्दरः श्रीमान् नीतिमान् अमरदत्तनृपपुत्रः सुरेन्द्रदत्ताऽपरनामा यशोधरो नाम राजा बभूव। तस्मिन् राज्यं कुर्वाणे सर्वा अपि प्रजाः प्राय ईति-भीति-व्यथा-रोग-दुर्भिक्ष-डमरवर्जिता आनन्दपूरिताश्चाऽभवन्। पुनर्धेनवः सुस्वादुबहुक्षीरवर्षिण्यो, वृक्षाश्च सदाफलाः, नद्यश्च अक्षीणजला बभूवुः। पुनस्तस्य राज्ञः सर्ववैरिणाम् आक्रमणाद् एकच्छत्रा पृथ्वी बभूव। चन्द्रज्योत्स्नया इव सर्वतोऽभिव्यासया तत्कीर्त्या च विश्वं धवलीचक्रे। पुनस्तस्य जलधितरङ्गाणामिव पवनवेगगामिनां जात्यतुरङ्गाणां कापि गणनैव नासीत्। मेघा आकाशमिव अञ्जनगिरितुल्यप्रभा मदजलस्राविणो महागजेन्द्रा भूमिं व्यापयन्ति स्म। पवनैरिव सर्वतो गामिभिर्महाबलैस्तत्पदातिभिरितरजनानाम् अनुल्लङ्घ्यापि भूमिः करतलोपमा चक्रे। एवं बहुविधसमृद्ध्या स राजा शब्द-रूप-रस-स्पर्श-गन्धादिपञ्चेन्द्रियविषयान् यथावसरं बुभुजे। हे राजन्! पुरा भवान्तरे पुण्ययोगेन प्रधानपदवीं प्राप्तः सोऽहम् ईदृशो राजाऽभूवम्। तस्मिन्नवसरेऽहं महैश्वर्यसुखमग्नत्वाद् देवत्वेऽपि निःस्पृहः सन् सुखेन कालं निर्गमयामि। दिनं वा रात्रिं वा, उदयं वा अस्तं वा, किमपि न जानामि। पुनस्तदा नयनानन्ददायिनी रमणीयाऽङ्गोपाङ्गशोभिता स्नेहपूर-

पूरिता नयनावली नाम पट्टराज्ञी ममातीव वल्लभाऽऽसीत्। तस्या वियोगं क्षणमप्यहं न सोढुं शक्नोमि। अथ तया राज्या सह आरामविहार-पुष्पाऽवचयन-जलकेलि-दोलाधिरोहण-मद्यपानादिविविधविलासैर्मम परमसुखमये कियति काले गते सति तत्कुक्षिसंभवो गुणधरो नाम पुत्रो बभूव। तद्दर्शनेन मम हृदयेऽतीवानन्दः समुत्पन्नः, 'अयं बालो मम सकलं कुलमुद्धरिष्यति' इति विमर्शात्। हे राजन्! ततस्तत्राह विपुलपुत्र-कलत्र-मित्रादिव्यामोहमग्नः सन् कालं गमयामि, मुक्तिप्रदभगवद्वीतरागं कदाचिद् मनसाऽपि न चिन्तयामि। अथाऽन्यदा तया भार्यया सह कौतुकेनाऽहं गवाक्षे उपविष्टोऽभूवम्, सा च मम मस्तके केशान् कुसुमैर्जग्रन्थ। तदा एकम् अर्धपाण्डुरं मम केशं सा स्त्री गृहीत्वा मदग्रे मुमोच। अहं च तं यमदूतमागतं विलोक्य हृदि चकितोऽभूवम्। ततोऽहं संसारसागराद् भीतो विषयजालाद् विरक्तश्च सन् एवं चिन्तयितुं लग्नः—"अहो! अयं जीवो विषयसुखेभ्यः कदापि पराङ्मुखो न भवति, अनादिपूर्वसंस्काराद् इन्धनेभ्यो वह्निरिव सर्वदा अतृप्त एवाऽवतिष्ठते। तथा अमी कामभोगादयः पुनः पुनः सेव्यमाना अपि जन्तोर्मोहाद् नवनवा भासन्ते, न पुनस्तत्त्वतोऽपूर्वाः सन्ति। ततस्तेषु पुनः पुनः प्रवृत्तिः चर्वितचर्वणन्यायेन अयुक्ता एव। यदुक्तम्—

"जीवित्वा सुचिरं लोके किमपूर्वं विलोक्यते?। दिवसो रजनी सन्ध्या वर्षा ग्रीष्मस्त एव हि ॥ १ ॥
द्वादशारमिदं चक्रं तदेव परिवर्तते। भ्रमन्ति यत्र भूतानि स्थावराणि चराणि च" ॥ २ ॥

अपिच,–"बालस्य मातुः स्तनपानकृत्यम्, यूनो वधूसङ्गम एव तत्त्वम् ।
वृद्धस्य चिन्ता चलचित्तवृत्तेरहो ! न धर्मेक्षण एव पुंसाम् !" ॥ १ ॥

"यौवनं जलतरङ्गचञ्चलं, जीवितं जलदजालसन्निभम् । सङ्गमाः कपटनाटकोपमा, हन्त ! दुस्तरतरो भवोदधिः ॥१॥

निगृह्य केशेषु निपात्य दन्तान्, बाधिर्यमाधाय विधाय चाऽऽन्ध्यम् ।
कामान् बलादेव जरा हिनस्ति, स्वेनैव नो मुञ्चति पूर्वमेव" ॥ २ ॥

अन्यच्च, प्राणिनां परलोकगमनम् अचिन्तितमेवागच्छति, अतो मरणकालात् पूर्वमेव किञ्चित् शम्बलं विधीयते तद् वरम्, पश्चात् किमपि कार्यं न सिध्यति। ततोऽहं वेगेन राज्यं परित्यज्य, शुद्धसाधुवेषमादाय, तपोवने गत्वा, आत्मकार्यं साधयामि । यतो मत्पूर्वजैस्तु अभुक्तभोगैरेव व्रतं गृहीतम्, न पुनः पलितं दृष्टम्, अहं तु महाप्रमादी अद्यापि विषयपङ्के निमग्नोऽस्मि । अथ शुभक्षणे पुत्रस्य पट्टाऽभिषेकं कृत्वा दिनत्रयाऽनन्तरमेव विमुक्तस्वजनादिसङ्गो भिक्षाचरो वनभूमिशायी समाधिलीनः समशत्रु-मित्रो निरञ्जनो निर्विषयो निःस्पृहश्च सन् तपस्विनां मार्गम् अङ्गीकृत्य महानन्दमयं मोक्षं प्राप्तुकामो व्रतमाचरिष्यामि"। एवं विचिन्त्य हे राजन् ! तदा मयि दीक्षाग्रहणोन्मुखे सति सा नयनावली देवी दीनवदना सती माम् उवाच–"हा प्राणनाथ ! अहं भीताऽस्मि, हा ! अहं तपस्विनी हताऽस्मि, हे स्वामिन् ! अकस्मादेव कथं विरक्तीभूतोऽसि ? । हे प्राणप्रिय ! अद्य त्वयि शस्त्रं त्यक्त्वा वनं भजमाने सति अनाथानां प्रजानां रक्षणं कः करि-

ष्यति ?। पुनरद्याऽपि त्वदुत्सङ्गस्थोऽयं गुणधरकुमारो बालोऽस्ति, तस्मिन् भारं मुक्त्वा स्वयं किं सुखमिच्छसि ?। अथवा संसारकारणैर्महामोहमयैर्वाक्यैर्भवतः किमर्थमन्तरायं करोमि ?। हे वीरपुत्रवतीप्रिय ! हे राजेन्द्र ! त्वं सुदुर्लभान् भोगान् भुक्त्वा कृतकृत्योऽसि, सुखेन स्वकार्याणि साधय। एषाऽहमपि मुक्तिमार्गं गमिष्यतो भवतोऽग्रगामिनी अस्मि। यतो मे गतिर्वा पतिर्वा सर्वस्वं वा जीवितं वा त्वमेवाऽसि। पुनर्दिने वा रात्रौ वा, सुखे वा दुःखे वा, भवने वा वने वा, स्वप्ने वा जागरणे वा तव चरणा एव मम शरणमस्ति"। इत्थं तस्याः सहचारिण्या वचनानि श्रुत्वा शोचन् अहमेवमवोचम्–"हे हरिणाक्षि ! त्वं मैवं वद, अकस्माद् मा साहसं कुरु, यतः शिरीषपुष्पवत् सुकुमारं तव शरीरं तपःकरणसमर्थं नास्ति। तपस्तु वनवास-भूमिशयन-शीताऽऽतपवातक्लेशसहन-भिक्षाऽऽहार-गुर्वाज्ञापालन-यावज्जीवाऽस्नानादिभिः लोहचणकचर्वण-खड्गधाराक्रमणतुल्यम् अतिदुष्करं विद्यते, न पुनः सुखसाध्यम्। अन्यच्च, अयं गुणधरो बालो मयि त्यक्त्वा गते सति त्वां विना एकाकी कथं स्थास्यति ?। तस्माद् हे देवि ! त्वया अत्रैव स्थित्वा स्वपुत्रः प्रयत्नतो रक्षणीयः, येनाऽहं सर्वथा निश्चिन्तो भूत्वा वनवासं व्रजामि"। इत्येतद् मद्वचः श्रुत्वा सा देवी मां पुनरेवमुवाच–'हे स्वामिन् ! मम राज्येन पुत्रेण सुखेन वा केनापि प्रयोजनं नास्ति, अहं तु भवता सहैव यास्यामि'। अथैवं तया देव्यापि मया सह गमने एवाऽङ्गीकृते सति अत्रान्तरे विषयवर्जितनिर्मलीभूतहृ-

१ भार्याया। २ शोकं कुर्वन्।

दयस्य तथा सह सुकृतकार्यकथां कुर्वतो मम वैतालिकैर्दिवसाऽवसानसमयो ज्ञापितः। ततोऽहं मुहूर्तमेकं त्यक्त्वा परमेष्ठिस्तवादिसन्ध्याविधिं विधिना कृत्वा विपुलकोमलशय्यातले सुप्तः सन् निद्रासुखेन रात्रिम् अगमयम्। ततो रात्रिपर्यन्ते दुःस्वप्नम् एकं दृष्ट्वा प्रबुध्य च सूर्योदयवेलां ज्ञात्वा श्रीवीतरागचरणस्मरणैकचित्तः सन् प्राभातिकं विधिं कृत्वाऽहं सभायां गतः। तत्र चैवं चिन्तयितुं लग्नः—'मया अद्य दुःस्वप्नो दृष्टः, अस्य किं फलं भविष्यति ?। अथवा मुनीन्द्रमार्गग्रहणोद्यतस्य मे किं तेन दुःस्वप्नेन' ?। एवं यावद् मनसि चिन्तयामि तावत् तत्र मदीया माता चन्द्रमती अपरनाम्ना यशोधरा समागता। तां च आगतां दृष्ट्वा मया चिन्तितम्—'एषा मदुपरि अतिवत्सला कथमपि मम मनोरथं कर्तुं न दास्यति। परं मम मनःकल्पित उपायोऽस्ति, तेनाऽहं स्वचिन्तितं करिष्ये'। इति विचिन्त्य सद्य उत्थाय तां प्रति 'नमस्ते मातः !' इत्युक्त्वा प्रणम्य च उचितमासनं दत्तम्। तदा तया आसने उपविश्य इत्थमाशीर्दत्ता—

"अद्य ते विपदो यान्तु स्फुरन्तु तव सम्पदः। त्वं वत्स ! भुवि नो वाक्यै रक्षकत्वं सदाऽऽमुहि" ॥१॥

अथ तदाशीर्वचःप्रान्ते मम तया सह वार्त्तालापो बभूव। तत्र च मयोक्तम्—"हे मातः ! अद्यैकः स्वप्नो दृष्टः"। तयोक्तम्—'हे वत्स ! कोऽसौ ?, मां कथय'। तदा मयोक्तम्—"हे अम्ब ! विरुद्धोऽस्ति। तथाहि—

---

१ प्रबोधकरैः स्तुतिपाठकैः। २ अस्माकम्।

अद्य पश्चिमनिशायां सूर्योदयात् पूर्वम् अहं निद्रायाम् एवमपश्यम्, यदुत, 'महाप्रासादस्य सप्तमभूमौ मनोज्ञसिंहासने स्थितोऽहं भवत्या अकस्मात् पातितः, ततो भूतले लुठन् प्रथमां भूमिं प्राप्तः। मत्पृष्ठत एव त्वमपि तथैव विलुठन्ती अधो निपतन्ती प्रथमभूतले संप्राप्ता'' । तदग्रे सत्यमित्युक्त्वा मयि मौनेन स्थिते सति तया मात्रा पुनः पृष्टम्–'हे पुत्र ! तदनन्तरं किं जातम्' ? । तदा मया स्वकार्यसिद्ध्यर्थं मनःकल्पितम् ईदृग् वचः प्रोक्तम्–'हे मातः ! ततोऽहं शीघ्रमुत्थाय शिरःकेशादिलोचं विधाय मुनिवेषं धृत्वा श्वेताऽम्बरधरः सन् पुनरपि महाप्रासादसप्तमभूमिकां समारूढः । तत एव हे अम्ब ! साम्प्रतं तादृशं व्रतमादाय दुरन्तं दुर्जयमपि इमं स्वप्नं सत्यापयितुमिच्छामि' । इत्थं मद्वचः श्रुत्वा सा माता पूत्कारं कुर्वती वामपादं भूमौ दत्त्वा उवाच–'हे वत्स ! गोत्रदेवतास्तव दुःस्वप्नं दूरीकुर्व्वन्तु । यत् पुनस्त्वं व्रतग्रहणरूपं दुःस्वप्नस्य प्रतीकारमिच्छसि तत्तु विशेषाद् अमाङ्गल्यमस्ति । तस्मात् सर्वपश्वादिजातीनां युगलानि आनाय्य कालिकापीठे हत्वा अत्रार्थे शान्तिकं कुरु' । इति तस्या वचो निशम्य अङ्गुलीभ्यां कर्णौ पिधाय मयोक्तम्–'शान्तं पापम्, मा मैवं पुनर्ब्रूयाः । यतो जैनाः स्वप्नेऽपि जीवघातं कर्तुं न शिक्षिताः' । इत्थं निषिद्धाऽपि सा पुनराग्रहं चकार, तदा मयोक्तम्–'वरं भवतु मे मृत्युः, परं नाऽहम् इदं कर्म करोमि'। ततः सा करुणस्वरेण 'हा हताऽस्मि हे वत्स ! यदीदं नहि मन्यसे' इति वदन्ती मम पादयोः पपात । तदा तस्या विनयलोपतो मया कोपाद् आत्मघातं कर्तुं स्वकण्ठकन्दले कोशादाकृष्य खड्गो मुक्तः । ततस्तुमुलारवं कुर्वाणैः

सामन्त-मन्त्रि-वेत्रिप्रमुखैः सद्य उत्थाय मम खड्गो बलादाच्छिद्य दूरे निहितः । तदा सा माता 'हे पुत्र! दृष्टं ते मातृवात्सल्यम्!, साधु विनीतोऽसि!, इत्यादिवचनैः मां तर्जयन्ती पुनरेवमभाषत—"हे वत्स! यद्यपि त्वं विरक्तोऽसि, जीवघातं नेच्छसि, तथापि साम्प्रतं यस्य कस्यापि पक्षिणः शब्दः श्रूयते स एव पिष्टमयः पक्षी त्वया देव्याः पुरो हन्तव्यः । एतावदेव याचेऽहं, मम एतद्वचनं कुरु" । ततोऽत्याग्रहाद् अल्पदोषत्वाच्च मयापि तद्वचनमङ्गीकृतम् । अथ तस्मिन् अवसरे दूराद् जल्पतः कुर्कुटस्य शब्दोऽस्मत्कर्णगोचरो जातः । तदा जनन्या पिष्टमयः कुर्कुटः कारितः । स च हरिद्रारञ्जितचञ्चु-चरणो लाक्षारागोदकशोणितो गैरिकारक्तशिखाशोभितो रक्त[1]चन्दनचर्चितश्च सन् तैर्भावैः सजीववत् चक्षुषा विलोकयन्निव शुशुभे । ततोऽहं मातृप्रेरितो मर्दना-ऽभ्यङ्ग-स्नानादिना पवित्रीकृतदेहो रक्तवस्त्राणि परिधाय कालिकाभवनं गत्वा पुष्प-धूप-दीप-गन्ध-चन्दन-विलेपनादिभिरभिनवभक्त इव चण्डिकामभ्यर्च्य पञ्चशब्दनिर्घोषे जायमाने कोशात् खड्गमाकृष्य तं पिष्टकुर्कुटं हतवान् । तदा सा चन्द्रमती माता तं पक्षिणं शेषार्थं भक्षणं कर्तुमिच्छन्ती गृहमानीय सिद्धकर्म्मनामसूप[2]कारेण मांसमिव पाचयामास । ततो भोजनाऽवसरे जनन्या देवीप्रसादबुद्ध्या पूर्वं तत्कुर्कुटस्य मांसं मम परिवेषितम्, मया च तत् पिष्टमपि प्रायो मांसकल्पनया कृतत्वाद् न स्वीकृतम् । ततस्तया अत्याग्रहे क्रियमाणे मयोक्तम्—"हे मातः! मांसं वीर्य-रुधिरनिष्पन्नत्वाद् अतीवाऽपवित्रमस्ति,

---

१ लोहितचन्दनचर्चितः । २ सूपकारः पाचकः ।

अत एवेदं मह्यं न रोचते । पुनर्नाऽहं गृध्रः शृगालो वाऽस्मि यद् मांसभक्षणतत्परो भवेयम् । मम तु दर्शनादिना एव मांसं वमनकारकं संपद्यते । तथा मांसशब्दस्य अन्वयार्थमपि शृणु—

"समहं भक्षयाम्येनं स वै मां भक्षयिष्यति । इत्यामिषस्य सर्वज्ञैर्मांसनामाऽन्वयः कृतः" ॥ १ ॥

अथैवं मया बहुधा प्रोक्तेऽपि मद्वचनम् अनादृत्य साऽकारणवैरिणी चन्द्रमती माता मां हस्तेन निरुध्य अत्यर्थं हसन्ती मद्वदनमध्ये तत् कुर्कुटमांसम् अक्षिपत्, स्वयं च मनसि हर्षिता बभूव । ततोऽहं भोजनं विधाय ताम्बूल-चन्दन-विलेपन-माल्ययुक्तः सौवर्णदण्ड-चलच्चामराभ्यां वीज्यमानः सन् कियतीं वेलां व्यतिक्रम्य सन्ध्यायां परमेष्ठिनमस्क्रियादिविधिं विधाय रजन्याः प्रथमप्रहरं विलङ्घ्य पुनरपि तस्या वल्लभाया गृहं संप्राप्तः । तत्र च अत्यादरवत्या तया कान्तया सह सुखवार्तां कर्तुमिच्छन् शय्यायां स्थितोऽहं तां प्रति एवमवोचम्—'हे कान्ते ! श्वो मम गुणधरकुमारस्य राज्यप्रदानोत्सवः कर्तव्योऽस्ति, परदिने च संयमो ग्रहीतव्योऽस्ति, तस्मात् कल्यदिने बहुकार्यसद्भावात् शीघ्रं जागरितव्यमस्ति, अतः साम्प्रतम् आवाभ्यां सत्वरं शयनं कर्तव्यमिति' । अथ अहमेवमुक्त्वा शून्यहुङ्कारकारिणीं तां स्त्रियं प्रति निद्रोन्मुखीमिव ज्ञात्वा सुप्त इव मौनं विधाय स्थितः । पुनस्तदाऽहं संयमग्रहणैकचित्तः सन् आत्मकार्याणि चिन्तयन् यावद् न चलामि, न जल्पामि, न च तां स्पृशामि, तावत् सा नयनावली देवी मीलितलोचनं मां सनिद्रं विचार्य सद्यः पर्यङ्काद् उत्थाय अन्यत्र ययौ । तदा मया चिन्तितम्—'साम्प्रतं समुद्भूतप्रभूतान्धका-

रेऽर्द्धरात्रसमये इयं मत्प्रिया क्व चलिताऽस्ति ?। यद्वा व्रतं दुष्करमालोच्य अस्याश्चित्तं चकितं दृश्यते !, ततोऽसौ आसन्नम् उत्पद्यमानं मम विरहं संचिन्त्य शोकादात्मघातं मा कार्षीः,' इति विचिन्त्य अहमपि हस्ते खड्गमादाय तदभिप्रायज्ञानार्थं गुप्तवृत्त्या तत्पृष्ठतश्चलितः। तत्र च सा स्त्री नम्रमुखीभूत्वा निद्राघूर्णितं पुनः पुनः कुप्यन्तं कुब्जम् अन्तःपुररक्षकं मिष्टवचनैस्तोषयन्ती मया दृष्टा। तदा एषा मदर्थं किञ्चित् प्रातःकृत्यमस्मै कथयिष्यति' इति यावदहं मनसि चिन्तयामि तावत् स कुब्जयामिकस्तां प्रोचे—'अरे दासि ! अद्य वासगृहाच्चिरेण कथमायाताऽसि' ?। एतद्वचनं श्रुत्वा मया विमृष्टम्—'यदयं कुब्जः 'अद्य' इति वदति तत् किमियं देवी अस्य पार्श्वे नित्यमायाति ?। यतोऽर्थापत्त्या परोक्षाऽर्थस्यापि प्रतीतिर्जायते। अथवा स्त्रीचरित्राणां विषमा गतिर्वर्त्तते, अन्यथाऽसौ दग्धस्थाणुरिव श्यामः कुरूपः सेवकाऽधमः स्वामिनीप्रायामेतां मत्प्रियां दासीसम्बन्धेन कथमुवाच ?। अपि च, अहमिति मन्ये समस्तं जगल्लोकं हन्तुमिच्छता क्रूरेण दैवेन सर्प्पदंष्ट्रा–ऽग्नि–यमजिह्वा–विषाङ्कुरान् संमील्यैव इमा दुष्टाः स्त्रियः कृताः सन्ति, यत एताः स्त्रियः कामान्धाः सत्यो न प्रतिष्ठां पश्यन्ति, न सौजन्यं, न दानं, न च गौरवं, नापि स्वपरहितं गणयन्ति। अत एव चन्द्रलेखेव कुटिला, सन्ध्येव क्षणरागिणी, नदीव नीचगतिरियं कामिनी सत्पुरुषैस्त्यक्ता; शास्त्रे निन्दिता च। अथवा एवं जाने—अयं कुब्जो जडः सुप्तोत्थितो भ्रमाद् देवीम् अज्ञात्वा सामान्यत इदमसम्बद्धं वदति, न तु जानन्, अन्यथा कथमेतां राजपुत्रीं मत्पट्टराज्ञीमयं वराकः किङ्कर एवमवगणयेत् ?।

अथाहं यावदेवं चिन्तयामि तावत् स कुब्जस्तां देवीं सद्यः केशपाशे धृत्वा कम्बाभिर्गाढमताडयत् । तदा साऽपि दीनवदना तं प्रणमन्ती एवमुवाच—'हे स्वामिन् ! हे प्राणवल्लभ! किं करोमि !, अहं पराधीनाऽस्मि, अतस्त्वं प्रसन्नो भव । ममैकमपराधं सहस्व, पुनर्नैवं करिष्यामि । ततस्तस्याऽपि कोपे उपशान्ते सति तयोरुभयोरपि कोकिलकाकयोरिव भूमिशय्यायां गाढालिङ्गनबन्धनसम्भोगः संजातः, तदा एतत् सकलं स्वगृहस्वरूपं स्वदृष्ट्या विलोक्य क्रोधाद् दष्टाधरेण पुनर्निश्वासान् मुञ्चता मया सद्यः कोशात् खड्गमाकृष्य हस्ते गृहीत्वा मनसि चिन्तितम्—'किमहं पूर्वमेनं स्वामिद्रोहकारिणं पुरुषाऽधमं कुब्जकं हन्मि, किं वा इमां पापां कुलटां कलङ्किनीं स्त्रीं हन्मि'?। अथैवं चिन्तयत एव मम चित्ते पुनरीदृग् विचारः समुत्पन्नः—'अहह ! इदमीदृशमनार्यं विरुद्धं कर्म्म कृत्वा स्त्रीघातादिपातकेन किमर्थमहं स्वकीयं परलोकं मलिनं करोमि ? स्वार्थभ्रष्टश्च भवामि ?। अन्यच्च, येन खड्गेन घोरतरवैरिणां गजघटास्थूलकुम्भस्थलानि भित्त्वा बहुलमुक्ताफलैर्भूमिरास्तृता, सोऽयं रणनिपुणो मदीयखड्गोऽधुना नारी–कुब्जप्रमुखशिरसि प्रेर्यमाणो लज्जां प्राप्स्यति, इत्यतः सृतमनेन विकल्पेन। परमस्मिन् लोके स्त्रियः स्वभावत एव सर्वविकारनिधयो महादोषदुष्टा दृष्टाः ।

उक्तं च–"अनृतं साहसं माया, मूर्खत्वमतिलोभता । अशौचं निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः" ॥ १ ॥



अथैषा कुलटा तु स्वयमेव स्वकृतदुष्कर्मफलं भोक्ष्यति, परमनया हीनाऽऽचारिण्या मम गुणधरः कुमारो लोके लाघवं यास्यति, यथा मलिनया भूमिच्छायया निर्मलोऽपि चन्द्रो लाञ्छनं प्राप्तः, एषा मम हृदि महती

चिन्ता विद्यते, अपि च, अधुना अस्याः कलङ्किन्याः ईदृशं परिणामं यद्यहं नाज्ञास्यम् तर्हि एनां स्त्रियं प्रति अतिमोहबद्धं मदीयं मनः कथं शिथिलमभविष्यत् ?। अतो विचार्यमाणमिदं सम्यक् कार्यं जातम् । यतोऽतः परं स्नेहशून्यहृदयस्य संयमं ग्रहीतुमिच्छतो ममैषा प्रियापि सुत्यजा संजाता। ततो हे राजन्! अहमित्थं मनसा विचिन्तयन् स्ववासगृहमागत्य विस्मयेन निश्चलः सन् शय्यायां सुप्तः, तत्क्षणं निद्रां प्राप्तश्च । ततः सूर्योदये बन्दिभिः स्तूयमानोऽहं सद्यः प्रबुध्य उत्सुकः सन् सभायामागत्य पौरजानपदैर्युक्तो महर्द्ध्या पुत्रस्य पट्टबन्धमकार्षम्। तदा सधवस्त्रियो मङ्गलानि गायन्ति स्म, ब्राह्मणा आशिषो ददुः, बन्दिजनाः स्तुवन्ति स्म, नटाश्च नृत्यन्ति स्म, वेणु-वीणा-मृदङ्ग-झल्लरी-भेर्यादीनां ध्वनिः प्रतिध्वानमुत्पादयन् प्रतिदिशं प्रससार। पुनर्दीनेभ्यो दानं दीयते स्म, तस्करादयश्च कारागृहाद् मोच्यन्ते स्म, दिग्भ्यश्च सामन्तादिनृपाणा प्राभृतानि समाययुः। तदेवं पुत्रस्य राज्यप्रदानोत्सवकरणेनाऽहं कृतकृत्यः सन् मध्याह्नसमये प्रमोदाद् ज्ञातिवर्गैः परिवृतो भोजनार्थं भोजनमण्डपे समागत्य स्थितः, तस्मिन्नवसरे सा कुलटा क्षणात् स्वमनसि एवं चिन्तयामास–'प्रातरयं महाराजो निश्चितं संयमं ग्रहीष्यति, अहं यद्येनं नाऽनुगमिष्यामि तर्हि लोका मां हसिष्यन्ति, इतश्च कुब्जस्नेहो मम प्राणनाशेऽपि दुस्त्यजोऽस्ति, अतः किमुपायान्तरचिन्तनेन ?, अद्याऽसौ नरपतिर्निश्चितं मया हन्तव्यः, येन मम सर्वेऽपि वाञ्छितार्थाः सिध्येयुः । यद्यपि अनेन राज्ञा मम किमपि विनाशनं नास्ति, अतो मम पापिन्याः एतस्य हननमयुक्तमेव, यतो यः पुमान् निर्दोषः स्वस्याऽन्येषां

च बहूनामीश्वरो धर्मकरणायोत्सुकश्च, एतस्याऽमङ्गलकरणादवश्यं दुर्गति जायते, तथापि अयमीदृक् कुब्जकस्नेहः, तथाऽमी विषयाः साम्प्रतं वियुक्ताः सन्तः पुनः स्वप्नेऽपि दुर्लभाः। अत इदमकृत्यमपि कर्त्तव्यमिति'।

अथ तत्र बन्धुवर्गभोजनानन्तरं मयि भोजनं कुर्वाणे सति तया नयनावल्या दासीकरतले समर्पितमतिरम्यं बहुद्रव्ययोगनिष्पन्नं वटकं समागतम्। तच्च 'हे स्वामिन्! अद्य भवदर्थं कान्तया रचितं मनोहरमेतद्वटकं भुज्यताम्' इत्युक्त्वा सा दासी मम भाजने मुमोच। तदा तत्र ते मयूराश्चकोराः कुर्कुटाश्च आसन्ना नाभूवन् ये हि विषमिश्रितमन्नमुपलक्ष्य राज्ञां पुरो नृत्यं रोदनं शब्दं च कुर्वन्ति। ततोऽहमपि भवितव्यतावशात् तद् विषमिश्रितं वटकमास्वाद्य जलेन मुखादिशुद्धिं विधाय पत्र-पूगफलादि करे गृहीत्वा यावत् उन्नतासने उपविष्टस्तावद् बहुमहोत्सवेन परिणीतया भार्यया मद्वधार्थं प्रयुक्तं तद्विषं देहे प्रसर्तुमारेभे, तदा तेन तीव्रविपाकेन कालकूटविषेण वैरिणो बलेनेव प्रसरता मम सप्ताऽपि धातवो भिन्नाः। ततः शरत्काले मयूरस्य पिच्छानीव मम निर्मूलानि रोमाणि समन्तात् प्रक्षरन्ति स्म, तथा प्रभातवातकम्पितवल्लीनां कलिका इव दन्ताः शिथिलबन्धनाः सन्तः पतन्ति स्म, तथा ग्रीष्मर्तुसंभवेन ऊष्मणा केतकस्याऽङ्कुरा इव स्फुटन्तो नखा विषव्याप्त्या श्यामीभूताः, तथा विषज्वरभरार्त्तस्य मम समस्तैरपि शरीराऽवयवैर्ज्वलद्भिरिव शमशमायितम्, पुनस्तदा मम जिह्वा जाड्यं गता, कर्णौ बाधिर्यं प्राप्तौ, तमःपटलैर्लोचने आच्छादिते। ततोऽहं दत्तमहाकपाटे कारागृहे बन्दीकृत इव चेतसि वाञ्छन्नपि रुद्धचेष्टत्वाद् वक्तुं श्रोतुं

द्रष्टुं वाऽशक्नुवन् विकीर्णकेशान्तो मुखाल्लालां विमुञ्चन् सद्यः सिंहासनादधो निपतितः। तदा भ्रान्तैर्म-त्पार्श्ववर्त्तिभिः सेवकादिभिः 'हा देव! किमिदं जातम्'? इत्येवं वाच्यमानोऽप्यहं जिह्वाया जडितत्वाद् न किमपि तान् प्रति अवोचम्। तदा प्रवीणेन वेत्रिणा विषविकारं ज्ञात्वा दुःखेन उच्चैःस्वरम् इत्थं जन-घोषणा कृता—हा हा! भो भोः कुमार-मन्त्रि-सेवकाः! श्रीमालवेश्वरो महाराजोऽद्य विषपीडितोऽस्ति, अतो यूयं शीघ्रं—धावत। वैद्य-मान्त्रिक-सिद्धादीन् आह्वयत, मणि-मन्त्रौ-षधादीनामिदानीमवसरोऽस्ति। येन केनोपायेन त्वरितं श्रीमहाराजस्य विषनिग्रहः क्रियताम्'। तत इत्थं वेत्रिवचः श्रुत्वा हा! हताः स्मः, हा! हताः स्मः, इति जल्पद्भिः प्रस्खलद्भिरुत्तालं समागतैः सर्वैः परिजनैः अहं समन्तात् परिवेष्टितः। तदा 'इदं वैद्यानामाह्वानं न शोभनम्' इति मनसि शङ्किता स्खलन्ती पतद्भ्रान्ता सा नयनावली देवी सद्यस्तत्रागत्य हस्ताभ्यां निजं हृदयं ताडयन्ती, दीनवदना च सती ममोपरि निपपात। ततो मद्वदनो-परि स्वशिरःकेशान् विकीर्य, कण्ठे विलग्य, कृत्रिमं रुदन्ती सा दुष्टा मदीये गले तथा गुप्तमङ्गुष्ठं ददौ यथा केनापि पार्श्वस्थेन नाऽलक्ष्यत। तदाऽहं तेन कण्ठग्रहणेन यत्किञ्चिदवाच्यं दुःखमन्वभूवम्। तद् ममात्मैव भगवान् वाऽज्ञासीद्, नान्ये लोकाः। ततोऽहं तया व्यथया आर्त्तध्यानपरः क्रोधान्धो मोहविह्वलश्च सन् प्राणमुक्तोऽभवम्। तदा मम सा भावना, स संतोषः, सा बुद्धिः, स मनोरथः, सर्वमेतद् महिषीकूर्दनवद् वृथा जातम्। हे राजन्! दुर्जयस्य अन्तरायकर्मण उदयात् ते मम त्रयो दिवसा न व्यतीताः, अन्तरा

एवाऽकस्माद् मृत्युः समाययौ। मातृवचसा तादृग् हिंसारूपदुष्प्रतीकारकरणाद् स दुःस्वप्नो मम सद्यः फलितः। ततः सा चन्द्रमती माता मामेवं मृतं विलोक्य स्वयमतीव शोकव्याप्ता बभूव। तदा निर्गमम् अलभमानेन महाशोकेन तत्कालं तस्या हृदयं स्फुटितम्। चक्षुर्विलोकमानमेव स्थितम्, हस्तो वक्षःस्थले एव स्थितः, इत्थमूर्ध्वस्थितैव सा झटिति प्राणैरमुच्यत। इति श्रीमद्यशोधरचरित्रे नृपस्य जनन्याश्च प्रथमो भवः ॥ १ ॥

---

## अथ तयोर्द्वितीयभवस्वरूपमुच्यते–

भो नरेश्वर! ततः सोऽहं यशोधरः सा च चन्द्रमती माता द्वावपि पिष्टमयपक्षिहननप्रभावात् तिर्यग्योनिकौ अभूताम्। तत्राहं पक्षिजातौ समुत्पन्नः, सा च स्थलचरजातावुत्पन्ना। यतः—कर्तुः कारयितुर्वाऽपि कर्मविपाकस्तुल्य एव प्रायो भवेत्।

उक्तं च—"स्वयं मज्जति दुःशीलो, मज्जयत्यपरानपि। तरणार्थं समारूढा, यथा लोहमयी तरी" ॥ १ ॥ 

तत्राऽहं तु हिमाचलपर्वतनिकटवर्त्ति'पुलिन्दगिरि'नामपर्वतस्य वने एकस्या मयूर्याः कुक्षौ गर्भत्वेन समुत्पन्नः। तत्र वर्त्तुलाऽण्डकसंस्थानोऽहं क्रमेण जठराग्निना पक्वः। परं कूजन्त्याः, आकाशं गच्छन्त्याः, पृथि-

व्यामन्यत्र पतन्त्यास्तस्या गर्भस्थोऽहं बहुभिरुद्घातैः पीडितोऽभूवम् । ततः काले स्वभावान्नीलकण्ठः शिखाधरः संस्कारैरेव तज्जातियोग्यमाचारं शिक्षितो मयूरोऽहं जातः । तदा बालस्यैव मम माता तु केनचित् पापिना व्याधपुत्रेण हता, अहं च अजातपक्ष एव विरसं पूत्कुर्वन् गृहीतो नन्दावाटकवासिनः कोट्टपालस्य प्रस्थप्रमाणसक्तुभिर्विक्रीतश्च । ततोऽवकरनिकरमध्यवर्त्तिकृम्याद्याहारेण पुष्टैः पातकैः पोष्यमाणं मम शरीरम् अचिरेणैव पुष्टमासीत् । तथा पृष्ठभागे विविधमणिकिरणसमूहतुल्यो रमणीयः पिच्छभारः समुत्पन्नः । अथैकदा नाट्यविद्यायां निपुणो मृदुस्वरो दर्शनीयोऽहं कोट्टपालेन एकाग्रचेतसा दृष्टः । ततो हृष्टेन तेन मम प्राग्भवपुत्रं गुणधरमेव राजानं प्राभृतीकृत्य उज्जयिन्यां प्रेषितः । अथ या मम चन्द्रमती नाम माताऽभूत् साऽपि ततो मृत्वा करहाटकदेशे धान्यपुरे नगरे एकस्याः शुन्या गर्भे श्वानत्वेन समुत्पन्ना । स च श्वानो वक्रपुच्छः कृशोदरः सर्वपिङ्गवर्णः खरनखः पवनादपि वेगवान् रमणीयश्चङ्क्रमणः संजातः । ततोऽन्यदा स कुर्कुरस्तन्नगरस्वामिना शोभनो दृष्ट्वा महाप्राभृतबुद्ध्या तस्यैव गुणधरनृपतेः प्रेषितः । तौ च मयूर-श्वानौ समकालमेवोज्जयिन्यां समागतौ, सभायां स्थितस्य तस्य राज्ञः पुरो मुक्तौ च । ततस्तौ मयूर-श्वानौ दृष्ट्वा स मालवेश्वरः प्राग्भवसम्बन्धात् समुल्लसितनयनकमलः संजातरोमोद्गमश्च सन् अतीवानन्दं प्राप्तः । ततो याभ्यां पुरुषाभ्यामावां तत्रानीतौ ताभ्यां नृपतिर्मनोज्ञदुकूल-काञ्चनादिपारितोषिकं

१ तीक्ष्णनखः ।

दत्त्वा विससर्ज्ज । आवयोश्च कण्ठकादीनि भूषणानि कारयित्वा क्षणमपि आवां दृक्पथाद् बहिर्न चकार । तथा तस्य जननी शुनः शुश्रूषार्थम् अकाण्डमृत्युनामानं श्वानपालकं प्रति शिक्षां ददौ, मां तु शकुनपालकं प्रति पालनाय समार्प्पयत् । तथा तयोर्ग्रामवासादिकं समधिकं चकार। एवम् आवामुभौ जननी–पुत्रौ तत्र भवान्तरे पाल्यमानौ क्रमेण पुनः स्वगृहमायातौ । ततः कियति काले गते सति एकदाऽहं कौतुकाद् विविधगतिविशेषैर्गृहमध्यमवगाहमानः पक्षयुग्मं धुनानो धवलगृहस्य रत्नमयपक्षिनिवेशनस्थाने आरूढः । तत्र चान्तःपुरीणां मञ्जीरादिरणितगर्भं सजलजलदधीरं नाट्यशालासमुत्थं मृदङ्गध्वनिमाकर्ण्य प्रमोदाद् अहमपि नृत्यमकार्षम् । ततो मया इतस्ततो विचरता गवाक्षविवरान्तरे दृष्टिं प्रक्षिपता चित्रशालायां वरेण इव तेन पापिना कुब्जेन भुज्यमाना प्रस्वेदकणव्याप्ताङ्गी विकीर्णालका सा नयनावली देवी दृष्टा । तदाऽहं तां विलोक्य चकितः सन् 'पुरा क्वापि इमौ दृष्टौ'इति विचिन्तयन् जातिस्मरणं प्राप्तः । ततः सर्वं स्वानुभूतं प्राग्भवस्वरूपं ज्ञात्वा कोपाऽऽक्रान्तः सन् सद्योऽभ्युत्थाय शरीराऽधिकप्रसरद्वीररसः आक्रोशेन कूजितं कुर्वाणश्चाहं चञ्चुप्रहार-नखताडन-पक्षघातैस्तौ वैरिणौ हन्तुं लग्नः । तदा तयोर्भोगेऽन्तरायं कुर्वन् अहं ताभ्यां संयोगवशाद् विगलितबन्धैराभरणैर्निर्दयं ताडितः। ततो विकलीभूतशरीरसंपुटः श्वाससंरुद्धकण्ठश्च सन् सद्यो गृहपर्यन्तभागादधो निपत्य सोपानमार्गेण लुण्ठंस्तां प्रथमां भुवं संप्राप्तो यत्र श्रीगुणधरो नृपः स्वयमक्षैः क्रीडति । ततो मत्पृष्ठत एव 'हा !—धावत धावत, अयं वराको गृह्यतां गृह्यताम्,'

इत्येवं तस्या नयनावल्याश्चेटीनां व्याकुलः शब्दोऽभवत्, तदा भिन्नार्थं तद्वचनं श्रुत्वा तत्र स्थितेन महाबलिना मातृश्वानेन स्वामिभक्त्या सद्य उत्थाय अहं कण्ठकन्दले गृहीतः

यतः–"स्वामिभक्ता च, शूरा च दीप्तकार्येषु सोद्यमा। प्रकृत्या सारमेयानां, जातिः पातकिनी मता" ॥ १ ॥

ततो हक्कारवपरैर्जनैस्त्याज्यमानोऽपि अहं तेन शुना यदा न त्यक्तस्तदा क्रुद्धत्वाद् अविमृशता राज्ञा मम मोचनार्थं काञ्चनमयेनाऽक्षपट्टेन स श्वा हतः। ततस्तेन मुक्तोऽहं मुखेन रुधिरं वमन् निश्चेष्टोऽभूवम्। स श्वानोऽपि च मर्मप्रहाराद् विकलाङ्गोपाङ्गो विभ्रान्तनयनश्च सन् भुवि पतितः। एवं तत्र भवान्तरे तौ द्वावपि मातृ-सुतौ अन्त्यावस्थां गतौ दृष्ट्वा गुणधरनृपः प्रोवाच—'हा मनोवल्लभमयूर! हा प्राणप्रियकुर्कुर! ममायं युवयोर्मृत्युः पित्रोरिव सुदुस्सहः समजनि। अपि च, हा मयूर! अद्य त्वां विना मृदङ्गानां ध्वनि-र्मेघस्य गर्जितमिव मम निर्विनोदमिवाऽऽभाति। तथा हा श्वान! शूकराकर्षणमन्त्रे इव त्वयि परलोकं गते सति मम मृगयादीनां दशा मूलतोऽपि विनष्टा। पुनर्भो मयूर-कुर्कुरौ! माम् एकाकिनं परित्यज्य अकारणबान्धवौ भवन्तौ यास्यतः, परम् अनृणीभूतयोर्भवतोः स्वस्त्यस्तु। भो भोः पुरोहिता-ऽमात्य-सेवकाः! शीघ्रमेव चन्दना-ऽगरु-कर्पुरैः पित्रोरिव अनयोरग्निसंस्कारः क्रियताम्। पुनर्यथा पूर्वं नरेन्द्रस्य जनन्याश्च निमित्तं दानं दत्तं तथा एतयोरर्थेऽपि दुर्गतिनाशनं दानं दीयताम्'। अथैवं तद्वचनं श्रुत्वा कण्ठगतप्राणे-

१ शुनाम्।

नापि मया विमृष्टम्—'अहो ! गुणधरोऽपि आवां 'पित्रोरिव' इति यद् ब्रूते तदयं किल पुत्रस्तु आवयोः श्रेयोऽर्थं महादानं दत्ते, अहं पुनः श्वानैर्भक्ष्यमाणस्तिर्यक्षु भ्रमामि, पुत्रेण दत्तं किमपि मम नागच्छति, परं किं करोमि ? सा मनुष्यभाषा मम नास्ति यया स्वहितं ब्रवीमि'। इत्थं दीनतया चिन्तयन् एवाऽहं सद्यः प्राणमुक्तोऽभूवम्। हे राजन् ! इदं हिंसायाः प्रसादेन प्राप्तं मयूर-कुर्कुरस्वरूपं प्रथमं भवान्तरं जानीहि, यतोऽपारे संसारनाटके वर्त्तमानानां जीवानां स्वकृतकर्मभिर्नानाविधा वेषाः समुत्पाद्यन्ते। इति श्रीयशोधरनरेन्द्रस्य तन्मातुश्च द्वितीयो भवः ॥ २ ॥

## अथ तृतीयो भवः ॥ ३ ॥

अथ हे राजन् ! कातराणां प्रायः श्रूयमाणमपि भयङ्करमावयोस्तृतीयं भवं शृणु।

ततोऽहं मयूरशरीराद् निर्गत्य सुवेलपर्वतस्य पश्चिमदिशि बहुलबब्बूल-शाल्मली-करीर-खदिरादिभिर्वन्ध्यवृक्षैः समाकुले, गृध्र-गोमायु-सर्प-नकुल-गौधेर-सिंह-शार्दूलादि-दुष्टसत्त्वैः संकीर्णे, समन्ताद् दवाऽनलज्वालाधूमधूम्रान्धकारिते, पाण्डुरोष्ररभूमिके, यमस्य दन्तैरिव वक्रतरतीक्ष्णाग्रैर्वज्राङ्कुरप्रायैः कण्टकप्रकरैः पूर्णे, अतिभयानके दुष्प्रवेशाख्ये वने एकस्या नकुल्या उदरे गर्भत्वेनोत्पन्नः। ततः कुम्भीपाकतुल्यगर्भाऽन-

लोष्मभिः अप्राप्तकाल एवाऽहं कृशो नकुलः प्रसूतः तदा ग्रीष्मर्तौ मरुदेशे नीरमिव सूतिकर्मणा दीनायाः क्षुधा पीडितायास्तस्या नकुल्याः क्षीरं क्षीणमभूत्। या हि तिरश्चां बालत्वे जीवनोपायवृत्तिः साऽपि मम प्रतिकूलदैवेन हृता। ततः सोऽहं तीव्रबुभुक्षार्त्तः खादनार्थं परिभ्रमन् भूमिस्थान् जन्तुविशेषान् भक्षयितुमारब्धवान्। तदा तादृग्दुष्टाहारेण पातकैर्मे शरीरं पुष्टं बभूव।

इतश्च तस्मिन्नेव दुष्प्रवेशवने स श्वानोऽपि ततो मृत्वा सर्प्पत्वेनोत्पन्नः। तत्स्वरूपं चेदम्—

चपलयुगलजिह्वः स्फारगुञ्जारुणाक्षो, भ्रमरकुलविनीलः कालपाशप्रकाशः।
विपुलतरफणावानायतश्वासदण्डः, कुटिलगतिरहीन्द्रः कुण्डली भीमभोगः॥ १ ॥ इत्यादि ॥

अथैकदा प्राणवृत्तिं कुर्वता मया गिरिनदीतटे मण्डूकभक्षणतत्परः स सर्प्पो दृष्टः। तदा कर्म्मपरिणामेन कोपान्धचेतसा मया कार्यविपाकम् अविमृश्य स नागः पुच्छे जगृहे। ततस्तेन सर्प्पेण ज्वलन्नयनतारकं शीघ्रं शिरः परावृत्त्य तीक्ष्णदंष्ट्रयाऽहं मुखे निष्ठुरं दष्टः। तदनु द्वावपि अपसृत्याऽपसृत्य परस्परं दन्तादन्तिमहाप्रहारैर्जर्जरीभूतौ। तदा एवं प्रहरतोरावयोः स्फुरिताऽहङ्कारव्याक्षेपेण कम्पमानयोश्च सतोः अकस्मात् कोऽपि अदृष्टतरो वनमध्ये विचरन् जरक्षनामा जन्तुविशेषः समागत्य मां जग्राह। ततश्चिरचिरिति मम चर्म दलयन् त्रटत्रटिति नाडीरपकर्षयन्, कटकटिति अस्थीनि खण्डयन् घुटघुटिति रुधिरं पिबन् स जरक्षजन्तुस्तथा मां खादितुं लग्नो यथा भीतेन इव जीवेन तत्कालं स्वकलेवरं त्यक्तम्। तथा स प्रचण्डः सर्पोऽपि

प्रहारजर्जरशरीरो भूतले लुठन् क्षणादेव मरणं प्राप्तः । हे राजन् ! येन यत् कर्म कृतं तस्यैव तत् कर्म उपतिष्ठते, न हि अन्येन भुक्तेऽपरस्य तृप्तिर्जायते । यस्मात् प्राग्भवे मयूररूपं मां प्रहरन् श्वानो नृपेण हतः, तस्मात् सर्प्परूपिणं तं प्रहरन् अहम् अकाले एव जरक्षेण नाशं नीतोऽस्मि। भो राजेन्द्र! हिंसाप्रसादेन प्राप्तम् आवयोरिदं नकुलोरगीयं द्वितीयं भवान्तरं जानीहि । इति श्रीयशोधरनरेन्द्रस्य तन्मातुश्च तृतीयो भवः ॥३॥

## अथ चतुर्थभवः ॥ ४ ॥

भो भूपाल ! मम चतुर्थं भवं शृणु—तत्र हि दुष्कर्मभिरहं स्थलचरेभ्यो बलाद् उद्धृत्य जलचरेषु प्रापितः। तथाहि—उज्जयिन्या नगर्याः पार्श्वे सिप्रा नाम सरसा महानदी विद्यते । या हि चञ्चलतरङ्गहस्तैर्नृत्यतीव, उज्ज्वलफेनपटलप्रकरैः ईषद् हसतीव, समन्ताद् मत्स्यस्फुरितैः परिपश्यतीव, सलिलध्वनिभिर्जल्पतीव । पुनर्यस्या वर्णनमेवम्—

कलहंससारसविरावती शुचिशीतलोदकनिर्वृतजना ।
घनपत्रवेतसवनस्थगिता शुचिवालुका निचयतल्पतला ॥ १ ॥

१ नकुल-सर्पसम्बन्धि । २ सजला । ३ मातृ-पुत्रयोः ।

अवमग्नमालववधूजघन–स्तनघातशान्तजलवेणिजवा ।
अपनीतचन्दनविलेपनकैर्धवलीकृता सुरनदीव नवा ॥ २ ॥

तस्यां नद्यां मत्सीकुक्षिसम्पुटे कर्म्मवशादहं रोहितमत्स्यत्वेनोत्पन्नः । तत्राहं स्वरूपेण अण्डजः, पक्षद्वययुक्तो, रक्तवर्णः, स्वजातिमांसभक्षकः, कामलम्पटो, महापापी, तत्रैव तन्मयत्वेन मोहितो विस्मृतजन्मान्तरः, इतस्ततो गतिविशेषैस्तां नदीमवगाहमानः पश्यतां लोकानां खदिरस्तम्भभ्रमम् उत्पादयन् स्वेच्छया कालमनैषम् । अथ स जननीजीवोऽपि सर्प्पभवाद् मृत्वा तस्यामेव महानद्यां जलचरजातौ शतसहस्रतन्तुमान् महान् ग्राहोऽभूत् । एकदा स पापी मां रोहितमत्स्यं दृष्ट्वा स्वतन्तुजालं विस्तार्य तैः सर्वतो रुद्धवान् । तत्रैवावसरे मदोद्धताश्चपलगामिन्यस्तस्या नयनावल्या दास्यो मज्जनार्थं नदीतटे समाजग्मुः । तासां मध्ये एका चिलाती नाम चञ्चला दासी विगलितवस्त्रा सती मदाधिक्यात् प्रथमं झम्पां ददौ । तदा स ग्राहः कोपाटोपाद् रक्तलोचनः सन् मां विमुच्य सद्यस्तां चेटीं जग्राह । ततो 'हा ! गृहीताऽस्मि गृहीताऽस्मि, भो भो लोका धावत धावत, मामस्माद् दुष्टजन्तोर्मोचयत मोचयत' । इत्यारारटिं कुर्वाणा सा निकटवर्त्तिपुरुषैः शीघ्रं सम्मिल्य धृता । तदा धीवरैस्तत्र सर्वतो जालं प्रक्षिप्य प्रौढशरीरः स ग्राहजन्तुर्नद्यास्तीरे आकृष्य छविच्छेदं[1] लेष्टु-कुठार-लकुटादिप्रहारैर्विविधकदर्थनया मारितः । अहं तु तत्रैव नदीतटे

१ शरीरच्छेदम् ।

जम्बालजालमग्नाऽङ्गो निर्भयः सन् पल्यङ्के इव तिष्ठामि। अथ कियत्यपि काले गते सति पापवृत्तिभिर्धीवरैर्जलान्तरे जालं क्षिप्त्वा अहं जीवन्नेव गृहीतः। ततो 'महामत्स्योऽयम्' इति विचिन्त्य सन्तुष्टैस्तैः कस्मिंश्चित् कार्ये समुत्पन्ने सति गुणधरस्यैव राज्ञोऽग्रे प्राभृतीकृतः। तदा स राजा जनन्यादेशवर्ती विनयी विवेकी च सन् तां नयनावलीं देवीमुवाच—'हे मातः! तातं पितामहीं च उद्दिश्य अस्य रोहितमत्स्यस्य पुच्छभागस्तु ब्राह्मणेभ्यो दीयताम्, शेषमस्मदर्थं सत्वरं पाच्यताम्'। ततः साऽपि 'हे वत्स! एवमेव करिष्यामि' इत्युक्त्वा दासीवर्गं समादिदेश। अथ दास्योऽपि तदादेशात् समुत्सुकीभूय कुठारादिभिः प्रबलं मे पुच्छं चिच्छिदुः। ततः क्षणाद् मम शरीरं हिङ्गु-सैन्धवैर्लिप्तं विधाय, हरिद्रावारिणा संसिच्य, जीरकचूर्णेन चर्चयित्वा च अभिनवघृतपूर्णायां कटाह्यां सूपकारैः परिपाचितम्। तदा ममात्मना नरकप्रायं दारुणं दुःखमनुभवतापि दुष्टैर्निगडितेन इव स महाकायो न परित्यक्तस्तदाऽहमेवम् अज्ञासिषम्—'अहह! महत्कष्टम्, कर्मकेलयो महाविषमाः!। हा अहं दैवेन हतः!, यतो मे पक्वं मांसं छित्त्वा छित्त्वाऽयं पुत्रो हर्षितः सन् खादति, पुनर्यस्य श्रेयोऽर्थं मम पुच्छं दत्तं सोऽहमेवाऽस्य पिताऽस्मीति'। इत्थम् आर्त्तध्यानलीनो धर्मध्यानपराङ्मुखश्च सन् तत्राहं तीव्रवेदनार्त्तः कालधर्मं प्राप्तः। तदेवं भो राजन्! ममेदं तृतीयं भवान्तरं मन्यस्व। इति श्रीयशोधरचरित्रे नृप-जनन्योश्चतुर्थो भवः ४॥



---

१ जम्बालः शेवालः।

## ॥ अथ पञ्चम-षष्ठौ भवौ ॥

अथ भो भूपते ! ततो मृत्वा यत्राहं समुत्पन्नस्तद् आकर्णय—या मम पूर्वभवमाता ग्राहत्वं प्राप्ताऽभूत् सा यदा क्रूरकर्मभिरन्योऽन्यं स्पर्द्धमानैर्धीवरैर्विनाशिता तदा सा उज्जयिनीसमीपस्थे ग्रामे अजाऽभूत्, अहं च कर्मवशात् तद्गर्भे समुत्पन्नः । ततः क्रमेण शृङ्गद्वययुक्तो रक्तदृष्टिः सप्तपर्णदलतुल्यकर्णः तृणभक्षकः श्मश्रुमान् गद्गदस्वरो मेषोऽभूवम् । अथैकदाऽहं यौवने विषयाकाङ्क्षी सन् संभोगार्थं तामेव निजमातरं समारूढो यूथाधिपेन दृष्टः, तदा साभिमानेन पापिना तेन यूथनाथेन रतश्रान्तोऽहं मर्मस्थाने विभिन्नः । ततः सद्यो मृत्वा कर्म्मवशात् तस्या एव अजायाः कुक्षौ स्ववीर्ये एव पुनरजत्वेन संजातः । तत्र हि दृश्यतां कर्म्मगतेर्वैचित्र्यम् !, या मम माता सा एव कान्ताऽभूत्, या पुनः कान्ता सा माता बभूव ! । तथा पिता कोऽपि नास्ति, अहं स्वयमेव स्वस्य पिता समजनि । ततः सोऽहं स्वयंभूस्तस्या उदरे तिष्ठामि, सा च गर्भभारेण मन्दगामिनी बभूव । एकदा मृगयार्थं बहिर्निर्गतः कुण्डलीकृतधनुर्दण्डो गुणधरो नृपः कस्यापि जीवस्य अप्राप्त्या निष्फलीभूतवनविहारत्वाद् विषण्णः सन् पश्चाद् व्याघृत्य मार्गे मन्दं मन्दं गच्छन्तीं ताम् अजां दृष्ट्वा बाणेन सद्यो निजघान । सा च गाढप्रहारात् तैरेव पदैः पृथिवीं पपात । ततो निष्पन्नकार्यो नृपः

---

१ संजातः ।

शीघ्रं तत्रागत्य ताम् अजां सगर्भां मत्वा सेवकान् आदिश्य तस्या उदरं विदारयामास । तदा बहिर्निर्गतं मां बालं रमणीयं विलोक्य स्वसार्थे समादाय सेवकेभ्यो वर्द्धनार्थं ददौ। ततस्तैः अजादिस्तन्यैः परिवर्द्धितो नाम्ना अयोनिसंभवोऽहं क्रमेण पुष्टशरीरः सन् नृपगृहे तिष्ठामि । अत्रान्तरे गुणधरो राजा मृगयाजयार्थं पञ्चदश महिषान् विनाश्य तेषां मांसपिण्डैः कुलदेवतानां पूजां कृतवान्। तथा तेषां कण्ठाऽऽमिषं याजक-ब्राह्मणार्थं परिपाचितवान् । ततो नृपाज्ञया गृहसूपकारैरुच्छिष्टधान्यस्य परिपाकविशुद्ध्यर्थम् अहं रसवती-गृहं प्रापितः। तत्र च मयाऽऽघ्रातपूर्वं सर्वं भोज्यं भुक्तम्। ततो ‘मेध्यं मुखं हि मेषाणाम्’ इति वेदोक्तत्वाद् ब्राह्मणैर्मेध्यम् आचमनं दत्त्वा, मदाघ्रातं सर्वं स्वयं भुक्तम्। तदनु ते ब्राह्मणाः सर्वेऽपि उत्थाय यावत् पक्षि-पङ्क्तिभिः स्थितास्तावद् आशीर्वादग्रहणोत्सुको नृपस्तान् नमस्कर्तुं तत्रागात् । तं च विशेषकृतसंस्काराभि-रन्तःपुरीभिर्युक्तं पुरःस्थितं विलोक्य हे राजन् ! अहं मनसि अतीव मोहाकुलः संजातः । तदा एकाग्र-तया तान् पश्यता मया स्वपूर्वजन्म स्मृत्वा सर्वोऽपि वृत्तान्तो ज्ञातो दृष्टश्च । विस्मयस्तब्धकण्ठेन सता सर्वं निजं राजकुलं दृष्टम् । ततो भूपतिर्ब्राह्मणान् नत्वा मयि शृण्वति सति एवम् उवाच–‘एषा द्विजानां पङ्क्तिर्मम पितुः उपनयतु, इयं पुनर्मातुः उपनयतु, तथा इयं मम गोत्रदेव्या उपनयतु’ । अथ नरेन्द्रे एवं वदति सति ब्राह्मणैरुक्तम्–‘हे महाराज ! त्वं जय जय, तुभ्यं सदा स्वस्त्यस्तु, तव पितरस्तु इह द्विजशरीरेषु



१ पवित्रम् ।

अवतीर्य स्वेच्छया पिण्डं गृहीत्वा निश्चितं चन्द्रलोकं प्रयान्तु'। तदा इत्थं तद्वचः श्रुत्वा मया चित्ते चिन्तितम्—'हा! हन्त मन्दभाग्योऽहम्!, सर्वथा हताशोऽस्मि, यतोऽयं मत्पुत्रो गुणधरो राजा मह्यम् एवं ददाति, अहं तु दौर्गत्यदोषात् प्रायो दुःखी एवाऽस्मि। हा पुत्र! भवता दत्तं किञ्चिदपि न प्राप्यते; एते सर्वे द्विजाः स्वेच्छया मां पितृलोकं प्रापयन्तु, अहं तु कैश्चित् कर्म्मभिर्मेषीभूय समागतोऽस्मि!। एतैः सर्वाऽन्नभक्षकैर्बृहत्कुक्षिभिर्द्विजैर्भोजितैर्नाहं स्वर्गमार्गं प्राप्नोमि'। इत्यादि मयि चिन्तयति सति स भूपतिस्त्रिः प्रदक्षिणीकृत्य काञ्चनदक्षिणां दत्त्वा प्रणम्य च तान् द्विजान् विससर्ज। तदा इदं राज्यं मे, अयं राजवर्ग्गो मे, एते हस्त्यश्वा मे, एतानि गृहाणि मे, इत्थं पुनः पुनः 'मे मे' शब्दम् अहं ब्रवीमि, परं मां कोऽपि न वेत्ति। अथ भोजनाऽवसरे सर्वा अन्तःपुरदेव्यस्तत्र समागताः। तदा मद्वियोगात् कृशीभूतशरीरा अप्राप्तपरपुरुषसङ्गमास्ताः सर्वा अपि पूर्वभवस्त्रियो विलक्षेण सता विलोक्य हे राजन्! मया प्राघूर्णकेनेव विमृष्टम्—'या अस्य राज्ञो माता मम प्राणाऽपहारिणी, सा नयनावली एव साम्प्रतं कथमत्र न दृश्यते?। तस्यास्तु एवंविधे कार्ये पुत्रस्य च महोत्सवे महानुद्यमोऽस्ति, केवलं धर्म्मकर्मणि प्रमादोऽस्ति। परम् अद्य इहाऽदर्शनाद् एवं ज्ञायते सा आर्त्ता वा मृता वा भवतु। द्वयोरेकं तु नियमाद् विद्यते, अन्यथा कथमधुना प्रियसुतस्य कार्ये नागच्छेत्?। अथवा ज्ञातम् अनागमनकारणम्, यतः कुब्जकं प्राणवल्लभं प्रयत्नेन पृच्छन्त्यास्तस्या अयं कालविलम्बो भवति, क्षणात् साऽप्यत्र निश्चितम् आयास्यति'। इत्थं मयि चिन्तयति

सति तत्रागताभ्यां द्वाभ्यां दासीभ्यां परस्परं वार्त्तालापः कृतः । तथाहि—'हे सखि! अद्य नृपाज्ञया किं घातितम्?' । द्वितीयोवाच—'अद्य इह महिषा विनाशिताः, देव्या बलिश्च विहितः' । 'एवं तर्हि राजमन्दिरे कोऽयम् अपरस्तीव्रदुर्गन्धो वर्त्तते ?, सद्योमृतानां जन्तूनां त्वेवं दुर्गन्धो न प्रसरति' । तदा द्वितीययोक्तम्—'हे प्रेममञ्जुषे ! महिषाणाम् अन्यस्य वा कस्याऽप्ययं गन्धो नास्ति, किन्तु एष नयनावल्या देव्या दुर्गन्धवायुर्विद्यते, यतस्तस्या रोहितमत्स्यपुच्छोदरादिमांसस्य सततम् अत्याहारकरणेन सद्योऽजीर्णभवनात् समस्तेऽपि शरीरे पुष्टं दुष्टं कुष्टं समुत्पन्नम्, तस्य पूतिप्रवाहमयो दुर्गन्धसिन्धुः इदं मनोज्ञं नृपगृहम् अवगाहते' । एतच्छ्रुत्वा इतरयोक्तम्—'हे प्रियसखि ! प्रबलाहारभक्षणेनाऽजीर्णतः कुष्टरोगोत्पत्तिर्बभूव इत्येवं मा वद, यतस्तस्याः पापिन्यास्तु कठोरतरपाषाणभक्षणादपि कोऽपि विकारो नोत्पद्यते, किन्तु तया दुराचारिण्या तादृशोत्तमनरेन्द्रस्य विनाऽपराधं विषप्रयोगो विहितस्तत्पापस्य प्रत्यक्षम् इमं परिपाकं जानीहि। यतोऽत्युग्रपुण्य-पापयोरकस्माद् अत्रैव भवे शुभा-ऽशुभं फलं प्राप्यते । पुनरपि, हे सखि! बलवति स्वाऽनुरक्ते बहुलोकेश्वरे सरलस्वभावे स्वस्वामिनि नृपे इयं दुष्टा यद् अदृष्टं कुकर्म्म चकार तद् या काचित् तिरश्वी भवेत् सापि नाऽऽचरति । यदुक्तम्—

"एणं[1] हरिण्यपि हि पाति बकं बलाका, कोकं[2] विना न हि पिबत्युदकं रथाङ्गी[3]।



---

१ हरिणम् । २ चक्रवाकम् । ३ चक्रवाकी ।

नारी नरं तु विनिहन्ति यतस्तदस्माद्, एवंविधाद् नृभवतः पशवो वरं ते" ॥ १ ॥

पुनर्हे सखि ! एतत् तु अस्याः पापिन्याः स्वकृतदुष्कर्म्मणः स्वल्पमेव फलं प्रादुर्भूतमस्ति, महाफलं तु मृताया अस्या नरकगमनरूपं भविष्यति । अथवा आवयोः किम् एतेन परनिन्दाकरणेन ?, यतः पापिनां वार्त्तापि प्रायः प्रायश्चित्ताय जायते । अतो हे सखि ! एहि एहि, इतः कुष्ठिन्या दृष्टिपथाद् बहिर्गच्छावः, कदाचिद् आवयोः स्वाङ्गसंवाहनस्याज्ञां मा स्म ददातु, नो चेद् गलितशरीरायाः कुष्ठिन्याः संसर्गदोषेण अयं संचरणो रोग आवयोरपि संक्रामेत्'। एतच्छ्रुत्वा इतरयोक्तम्–'हे सखि! मा भैषीः, अस्याः कलङ्किन्या मुखे सदा धूलिरस्तु । यतो य एव पापं कुरुते स एव लिप्यते, अतो मन्दं मन्दं चल, सा दूरस्था न निरीक्षते'। इति ब्रुवाणे शङ्कया व्याकुलीभूते द्वे अपि दास्यौ ततो निष्क्रान्ते । तदा हे राजन् ! अहं तु ता तथाभूतां श्रुत्वा द्रष्टुमुत्सुकः सन् राजमन्दिरे इतस्ततः परिभ्राम्यन् कस्मिन् कोणके तां साक्षाद् विलोक्य लज्जा-कौतुकौ-दासीन्यमिश्रेण चेतसा एवं व्यचिन्तयम्–'अहो ! मूलरूपाद् विपरीतभूतेन रूपेण इयं मे प्रिया नयनावली जन्मान्तरं प्राप्तेव दृश्यते !, तथा विष्टामिवाऽतिदुर्गन्धां मक्षिकाजालसंयुतामिमां देवीं शपथैरपि सांप्रतं 'सैव' इति कः प्रत्येति ? । पुनरस्या नेत्रयुगलं क्रुधेव रक्तीभूतं मलक्लिन्नं च दृश्यते, कर-चरणाङ्गुल्यः सर्वा अपि भयादिव संमिलिता विलोक्यन्ते, नासिका तु श्रमादिव मुखतटे लग्ना दृश्यते ! । अयं दुर्गन्धश्च

१ भाषायाम्–'सूग' ।

दशापि दिशो निरुध्य पुरतः प्रसरति । प्रतिरोमकूपविवरेभ्यो निरन्तरं प्रचुरतरा पूतिः स्रवति । पुनरस्या यत् पुरा वीणा-कोकिलाविजित्वरं सुललितं वचनमभूत् तदेवाऽधुना शृण्वतां जनानां परिहासहेतुर्भवति। अहह ! कर्म्मणां परिणतिरतीव विषमा !, यतो या इयं स्त्री पुरा ईषदपि दृष्टा सती महतामपि हृदयं हरति स्म, सा एव एषाऽधुना स्मृतापि विषयिणामपि चेतसि शूकामुत्पादयति। याऽस्या मुख-नयन-नितम्बादेः प्राक् शोभाऽभूत् सा लेशतोऽपि न दृश्यते। इदमीदृशमत्युग्रम् अस्याः कष्टजीवितं धिगस्तु' । इति विचिन्तयन् निष्ठीवमानोऽहं मुखं वक्रीकृत्य स्थितः । अथाऽस्मिन्नवसरे राजा महिषाऽऽमिषादिभोज्यं भुञ्जानः सूपकारमिदम् अब्रवीत्–'अरे ! एतत् तु केवलं न रोचते, किञ्चिद् विजातीयं मांसं शीघ्रमानय' । ततः स चिन्तयामास–'अयं देवश्चण्डप्रतिज्ञो वर्त्तते, भक्ष्यं तु तादृशं किमपि प्रत्यासन्नं नास्ति !, अतोऽलं विलम्बेन, क्षुधाऽन्धस्य राज्ञो भोजनावसरम् अनेन अजेनैव साधयामि' । एवं विचिन्त्य स पापी सूपकारो मे दक्षिणं पार्श्वं चिच्छेद, ज्वलद्भिरङ्गारैः क्षणाद् भटित्रं चाऽकरोत्। ततस्तं मांसपुद्गलं सद्यः संस्कृत्य भुञ्जानस्य राज्ञो दर्शयामास । स नृपोऽपि तत् किञ्चिद् नयनावल्यै दापयामास, किञ्चिद् अग्रासनस्थेभ्यः, किञ्चित्पुनः स्वयं बुभुजे। अहं तु स्रवद्रुधिरधाराभिरार्द्रीभूतं दुर्द्धरं शरीरं धारयन् सूपकारेण पुनः प्रयोजनोत्पत्तौ वधाऽर्थम् अवशेषितो निरहङ्कारो निर्विनोदो निरुद्यमो यथाऽवस्थितसंस्थानो यथोपागतभोजनो मीलितचक्षुः प्रहारविस्तारोद्भवं स्वसंवेद्यं महादुःखमनुभवन् तत्रैव भूतले पतितस्तिष्ठामि।

ततश्च तस्मिन्नवसरे योऽन्यो वृतान्तोऽभूत् तं शृणु–

हे राजेन्द्र ! या मम जननी यूथाधिपप्रिया अजा अभवत् सा यदा मयि गर्भस्थिते तद्भारमन्दगामिनी मृगयानिवृत्तेन गुणधरेण हता तदा ततो मृत्वा कलिङ्गदेशे रक्ताक्षस्तीक्ष्णशृङ्गाग्रो दुर्दन्तः स्थूलशरीरो महान् महिषः संजातः । स च बहूनां वस्तूनां भाराणां वहनेन लोकानाम् अत्यन्तमुपभोगाय समजायत । यतस्तादृशानां पुष्टता दुःखानुभवनार्थमेव । उक्तञ्च–

"दुःखसंवेदनायैव प्राकृतानां हि पुष्टता । वैहासिकानां विपुला विडम्बाय विदग्धता" ॥ १ ॥

एकदा स महिषो वाणिज्यकारिणां सुदुर्वहं क्रेतव्यादिभारं वहन् केनचित् कर्म्मयोगेन उज्जयिनीं प्राप्तः। ततो मार्गसंभवेन ग्रीष्मर्त्तुसम्बन्धिनाऽपि च महातापेन घूर्णितः स महिषो नगरीपार्श्ववर्त्तिनीं सिप्रां नदीं प्रविश्य तस्याः सरसं स्वादु निर्मलं जलं क्षोभयित्वा सद्यो मलिनीचकार, खलः पुमान् महाकवेः काव्यमिव। तथा शृङ्गप्रहारैराहत्य तस्या महतीं तटीं पातयामास, दुर्जनो दुर्वाक्यैर्मानिनः सत्पुरुषस्य प्रतिष्ठामिव । तथा नद्या हिमशीतलान् निर्मलांस्तरङ्गान् विक्षिपति स्म, कृपणः पुमान् कामिन्याः सविलासान् कटाक्षक्षेपानिव । एवं स महिषस्तटभूमौ दूर्वापर्वचर्वणं कुर्वाणो यन्त्रमुक्तपाषाण इव इतस्ततः संचरन् क्रीडति स्म । किं बहूक्त्या ?, स पशुरासन्नमृत्युरित्येवं निर्भयः सन् प्रवर्त्तते स्म, यदि वा विध्यातुकामः प्रदीपोऽपि

१ विदूषकाणाम् ।

कदाचित् प्रदीप्यते एव । अथ तस्मिन्नवसरे तस्यां सिप्रायां नद्यां स्नपयितुमानीतोऽश्वशालामुखमण्डनः सर्वलक्षणसंपूर्णः सर्वाऽवयवसुन्दरो राजवल्लभः किशोरोऽश्वस्तेन दृष्टः । दृष्ट्वा च स महिषो जातिस्वभावाद् वैरज्वरव्याप्तः सन् स्वाङ्गं कम्पयामास । उक्तं च—

"सहजं कृत्रिमं चेति द्विधा वैरं प्रचक्षते । सहजं निर्विशेषेण कृत्रिमं कारणान्तरात् ॥ १ ॥

हय[1]-कासरयोरज-वानरयोर्नकुलो-रगयोः करि[2]-केसरिणोः । वृषदंश[3]-विनायकवाहनयोः सहजं भुवि वैरमिह प्रथितम् ॥२॥

"तद् ब्राह्मण-श्रमणयोः प्रतिवेश्मपुंसोस्तद्वत् पितृव्यसुतयोरुभयोः सपत्न्योः ।

नैःसर्गिकं जगति वैरमकारणेन, केनापि कस्यचन किञ्चन नाऽपराद्धम्" ॥ ३ ॥

कृत्रिमं पुनरतीव दोषतः, कारणान्तरवशेन तद्यथा । रामरावण-सुभूमभार्गव-कृष्णकंस-कुरुपाण्डुजन्मनाम् ॥ ४ ॥

अत एव कोपाटोपात् समुत्पन्नैः प्रचुरतरफूत्कारैर्विकरालरूपः स महिष उद्दण्डैः खुराग्रैर्भूमण्डलं खण्डयन् इव तमश्वं हन्तुं सद्योऽभिमुखं धावति स्म । ततस्तीक्ष्णकृपाणाभ्यामिव शृङ्गाभ्याम् अकस्मात् तस्याऽश्वस्य हृदये प्रहारं चकार । तेन दुःसहप्रहारेण च सद्यस्तस्य हृदयं विभिन्नम्, तस्माच्च पलाशकुसुमाऽरुणं रुधिरं स्रवति स्म । ततः स तुरगोऽपि तत्प्रहारेण पीडितोऽपि सन् क्रोधात् तं दन्तैर्व्यथयामास । तदा समुत्पन्नाऽधिककोपः स महिषो बलात् तमश्वम् अधः पातयित्वा सद्यः खुरकुद्दालैर्विदारयामास । ततस्तं



१ अश्व-महिषयोः । २ हस्ति-सिंहयोः । ३ मार्जार-मूषकयोः ।

तुरगं हतं ज्ञात्वा भयाकुलैरश्वारोहैर्विषादात् प्रतिपदं स्खलत्पदैः सद्भिः तत्कालं नृपाग्रे गत्वा स वृत्तान्तो निवेदितः। तदा गुणधरो नृपस्तं व्यतिकरं श्रुत्वा कोपाटोपात् स्फुरिताऽधरः सन् सेवकेभ्यस्त्वरितं तन्महिषं बन्धनाज्ञा ददौ। सिद्धकर्म्मनामानं पापकर्म्मकारिणं सूपकारं च एवमादिष्टवान्–'अहो! भवांस्तं दुष्टं महिषं जीवन्तमेव पक्त्रिमं कुर्याद् येन स दुर्बुद्धिः सद्य एव स्वकृतापराधस्य फलं प्राप्नुयात्'। अथ यमतुल्यै राजपुरुषैः पौरुषात् स महिषो गाढं बद्ध्वा तत्र समानीतः, तदा सूपकारेण नृपाज्ञया पृथिव्या चतुर्दिक्षु चतुरः स्थूलान् लोहकीलकान् निहत्य तेभ्यो विनिर्गताभिः शृङ्खलाभिः स महिषः चतुर्ष्वपि चरणेषु पटमण्डपवद् गृहीत्वा तथा बद्धो यथा च्छिन्नवृक्षवत् चलितुं कूर्दितुं वा किमपि कर्तुं न समर्थो बभूव। इतस्ततः समन्तात् तत्क्षणं तथाऽग्निः प्रज्वालितो यथा संतापात् सर्वे लोका दूरम् अपसृताः। तदा तीव्राग्निदाहशोषितशरीरं मुखं व्यादाय गव्यूतिगामिनश्चण्डारवाक्रन्दान् कुर्वाणं तं महिषं समीपस्था दुर्लण्ठा वण्ठा नरा 'म्रियस्व, दह्यस्व' इति वारं वारम् अत्यर्थमाक्रोशन्ति स्म। पुनरश्ववधाऽपराधं स्मारं स्मारं परमाधार्मिका इव लगुडैस्ताडयन्ति स्म। ततोऽत्यग्नितापात् शुष्ककण्ठ-तालु-जिह्वो-ष्ठम् अत एव पानीयं पातुमिच्छन्तं तं महिषं स सूपकारस्तप्तं शुण्ठी-मरिच-पिप्पली-सैन्धवादिजलं पायितवान्। तेन चाऽतिसारेण तस्य अधोद्वारेण आन्त्रयन्त्रजालेभ्यः सर्वाण्यपि मलानि निर्गतानि। इत्थं तेन वैरिणा सूपकारेण आन्तरोपचारेण

१ पाकेन निर्वृत्तं पक्त्रिमम्।

स महिषः शोधितो दान्तः शोषितः संस्कृतश्च सन् निर्बलीभूतो दवानलमिव तं दुःसहं वह्निं सहते स्म । ततः क्रमेण स मृत्योः सत्यङ्कारभूतां मूर्च्छां प्राप्तः । अथ तं पाचयन् सिद्धकर्मा सूपकारो यथानिष्पन्नमांसानि मूपतेः पुरो ढौकयामास । तदा भूपतिश्छिन्न-मिन्नानि तस्य मांसानि भुञ्जानो मम दुष्कर्म्मभिः प्रेरितः सन् सूपकारमुवाच–'अरे ! इदं कठोरं महिषामिषं मह्यं न रोचते, तस्माद् अन्यद् मांसम् आनयस्व' । तदेदं नृपवचः श्रुत्वा 'तथा' इति वदतस्तस्य उल्केव क्रूराऽभिप्रायसूचिका दृष्टिः सद्यो मयि निपतिता । ततस्तस्यालोकनवलनैर्मेचित्ते 'सम्प्रति निश्चयेन मम भटित्रीकरणं संप्राप्तम्' इति प्रतीतिः संजाता । ततो 'हा ! अहं किं करोमि ?, क्व गच्छामि ?, ममाधुना का गतिर्भविता ?, हा ! अकस्माद् मे मरणक्षणः संप्राप्तः । हा पुत्र ! मा मा एवं कुरु, मां पितरं रक्ष रक्ष' इति अधैर्याद् अव्यक्तं विलपतो मम देहे सद्यो नाडीसमूहः संकुचितः, अस्थिसन्धानबन्धानां ग्रन्थयश्च शिथिलबन्धनाः संजाताः । ततस्त्रिभुवनं शून्यं पश्यन् विगतेन्द्रियपराक्रमोऽगाधभयान्धकूपमग्नचित्तः कण्ठगतप्राणश्चाहं तेन सूपकारेण कण्ठकन्दले गृहीत्वा ज्वलन्महिषसमीपम् आनीय सत्वरं फलवद् विदारितः । तदा तु हे मगधेश्वर ! स मम मांसानि भटित्रीकरणादिना संस्कृत्य पूर्ववद् भूपतिं भोजयति स्म । तदा हे राजन् ! सोऽहं सुरेन्द्रदत्तजीवोऽजः चन्द्रमतीजीवो महिषश्च द्वावप्यावां चिरकालात् पूर्ववत् पुनरेकस्यां चितायां निहितौ । सूपकारेण परिपाच्यमानौ भवान्तरसुतेन राज्ञाऽनेकधा विडम्ब्यमानौ महाभाग्यहीनौ क्रोधाद् इव प्राणैः परित्यक्तौ । इत्थं

समकार्यकारिणोस्तुल्यवेदनाविपाकवतोर्दहन-खण्डन-ताडन-तर्ज्जन-भर्जनप्रभृतिभिः प्रकारैर्बहु दुःखं सहमानयोरावयोः प्राग्भवमातृ-सुतयोः समकालमेव मरणम् अजनिष्ट। इदमावयोः पञ्चमं भवान्तरं जानीहि।

इत्थं भो राजन्! अदृष्टादौ अदृष्टान्ते चतुर्गतिचतुष्पथे चास्मिन् संसारपुरे भ्रमन्तोऽमी कर्म्मवशगा जन्तवो द्रव्य-क्षेत्र-काल-भावव्यवस्थया न कदापि विश्राम्यन्ति, किन्तु रत्नत्रयम् अप्राप्य निरन्तरं सीदन्तः पराधीनाश्च सन्तश्चतुरशीतिलक्षयोनिषु पुनः पुनर्जन्म-मरणादिक्लेशम् अनुभवन्ति। ये पुनर्लघुकर्माणो जीवाः सिद्धं बुद्धं शान्तं शिवम् अनादिम् अनन्तम् अजरामरम् अनेकम् एकम् अव्यक्तम् अजम् ईश्वरं नित्यं सर्वज्ञं परमात्मानं कथञ्चिद् विज्ञाय शुद्धमनसा सेवन्ते तेषाम् उत्तमानाम् इह संसारे कदापि जन्मादिक्लेशलेशोऽपि न जायते। हे राजेन्द्र! इत्थं सहजसुन्दरे प्रस्तावे सत्यपि यद् अहं महादुःखव्याप्तायां तिर्यग्योनौ पुनः पुनर्भ्रान्तस्तदहं हस्तगृहीतदीपकः सन् कूपे निपतितः, तथा कल्पवृक्षतले उपविष्टः सन् क्षुधया बहुपीडितः, मलयाऽचलचूलायां च स्थितः सन् दुर्गन्धदुर्भगोऽभूवम्। पुनर्मया पापिना क्षुद्रजन्तुना भवे भवे स्वकीयं प्राग्जन्म स्मृतं, परं धर्म्मध्यानं तु विस्मृतमेव, कदापि मनसि न आनीतम्। तथा कषायविषवल्लीतुल्यास्तास्ताश्चिन्ताः कृताः, परं रागद्वेषाऽभिव्याप्तेन सता वैराग्यं कदापि न प्राप्तम्। यत् किल निर्मलं चारित्रं मनुष्यभवे प्राप्यते तत् तु विषेण हन्यमानस्य मे न प्रादुर्भूतम्। तदनन्तरं पशुत्वेऽपि यदि धर्मध्यानम् उदयमागमिष्यत् तर्हि तिर्यक्षु तास्ता विडम्बनाः कथम् अभविष्यन्?। परं

कर्म्मेन्धनदहने वह्नितुल्यस्य तस्य धर्म्मध्यानस्यैवाऽभावात् शत्रुभूतैः कर्म्मभिर्यथा यथा आदिष्टं तथा तथा मया दृष्टम् । हे राजन् ! त्वं पश्य, तैः कर्मभिर्लाघवं प्रापितस्य मम अवन्तिस्वामिनः पूर्वं कपर्दिका-मूल्यम् आसीत् । ततः कर्म्मकुञ्जरैस्तूलमिवाकाशे विक्षिप्तोऽहं निस्सारः सन् पक्षिरूपेण चिरं परिभ्रान्तः, कुमरणेन मृतश्च । ततः पुनर्दीनहीनस्य बुभुक्षोर्वनवासिनो मम मुखे तैरेव कर्म्मभिर्मारणाय कालकूटस्य कवलः समर्प्पितः, सुकोमलं कलेवरं च श्वापदेभ्यः प्राभृतीचक्रे । तदनन्तरं च तैरेव कर्म्मभिः अपुनर्दर्श-नेच्छयाऽहं जम्बालजालभृते महाहृदे मज्जितः, तत्रापि तत्प्रेरितैर्धीवरैः सद्यः पाशैर्निबध्य नृपाय दत्त्वा नरकतुल्यं महादुःखं प्रापितः । ततः पुनर्नटाचार्यैरिव तैः कर्मभिः पुरस्ताद् अपरं पुच्छमिव मुखे कूर्चं विधाय मम पौरुषं विस्तारितम् !। किं बहूक्त्या ?, एभिर्दुष्टैर्मदीयपुरुषत्वविडम्बनाय यद् अवाच्यम् अश्रो-तव्यं कार्यं कृतं तत् केषामपि मा स्म भूत् । किञ्च, अन्ये लोकाः परस्मै शत्रवे कुपिताः सन्तो यद् अवा-च्यं वचो वदन्ति तद् एभिर्निर्लज्जैः क्रुद्धैरहं सत्यमेव कारितः । तथा वैरिणामपि गुणग्राही सन् सत्य-मेवाऽहं कृतज्ञोऽस्मि । तथाहि–तेषां कर्मणां प्रसादेन मया स्वायम्भवं पदं लब्धम् ! । पुनस्तत्प्रसादेनैव मया पित्रा वारं वारं समर्थेन भूत्वा स्वपुत्रादेरुदरपूरणमकारि ! । तथा तेषां प्रसादेन मया पुनः पुनर्विविधानि अपूर्वाणि दुःखानि लब्धानि । हे राजन् ! इत्थम् एकपिष्टमयकुर्कुटघातसंजातपातकेन एवंविधेषु विषमेषु मयूरादिभवान्तरेषु अहम् आवर्त्तितोऽस्मि । इति श्रीयशोधरचरित्रे नृप-जनन्योः पञ्चम-षष्ठौ भवौ ॥५–६॥

# ॥ अथ सप्तमो भवः ॥

अथ भो नरेन्द्र ! एतावद्विडम्बनाकरणेनाऽपि तेषां कर्म्मणां मनोरथा न सम्पूर्णाः। ततः पुनस्तैर्यद् आवयोर्विगोपनं कृतं तद् निशम्यताम्—आवाभ्यां किल एकः पिष्टकुर्कुटः पुरा निहत आसीत्, तत आवामपि हन्तव्यकुर्कुटत्वं प्राप्तौ, मयूर-श्वानादिभवास्तु वृद्धिपदे गताः ! । आवयोः कुर्कुटभववृत्तान्तस्तु एवम्—तस्या एव मम राजधान्याः समीपे एकश्चण्डालपाटकोऽस्ति । स च ईदृशः—

रुण्ड-तुण्डसमाकीर्णः पूतिगन्धभृतोऽशुचिः । विपच्यमानगोमांसो धूमधूसरिताऽम्बरः ॥ १ ॥
चर्म्मनिर्माणसंलग्नमातङ्गजनपूरितः । वधार्थमतिविश्वस्तपोष्यमाणविहङ्गमः ॥ २ ॥
अर्कदुग्धग्रहव्यग्रशृङ्गहस्तशिशुव्रजः । विलम्बितच्छगलकच्छेदनिःशूकशौनिकः ॥ ३ ॥
असेव्यः सर्वसाधूनामहितः सर्वदेहिनाम् । धूमप्रभाऽभिधानायाः प्रतिच्छन्द इवावनौ ॥ ४ ॥
यस्मिन् मारितसारङ्गरुधिराऽरुणिताङ्गणे । शार्दूल्य इव चेष्टन्ते रण्डाश्चण्डालयोषितः ॥ ५ ॥ इति ।

तस्मिन् एवंविधे दुष्टे चण्डे चण्डालपाटके द्वावपि आवाम् एकस्याः कुर्कुट्याः कुक्षौ गर्भत्वेनोत्पन्नौ । सा च पक्षिणी शरीरपुष्ट्यर्थं कीटकोटिकुटुम्बानि भक्षयन्ती प्राणानिव आवां यत्नेन वहति स्म । अथ तद्गर्भस्थयोरावयोर्यावत् परिपूर्णः कालो न समायाति तावत् कश्चित् तरुणो मार्जारः कुतश्चिद्

आगत्य निर्दयः सन् तां पक्षिणीं भक्षणाय प्रहृतवान् । ततः सा भयभ्रान्ता कम्पमानविसंस्थुलदेहा उच्चैरारटन्ती मरणोन्मुखी च सती सद्यस्तद् अण्डकयुग्मं मुमोच । तदा अस्मल्लक्षणं जात्यं तदण्डकयुगलं तस्या गर्भतो निपतितं सद् अवकरोपरि तस्थौ। तस्योपरिष्टात् काचिद् मातङ्गी गृहादिसंमार्जनोत्पन्नं रजः शूर्प्पकोणेन त्यजति स्म । तेन रजसा तद् अण्डकद्वयं पुनरपि आच्छादितं बभूव । ततस्तस्मिन् रजःपुञ्जे तत् शुषिरोदरसंस्थितं सूर्यतापेन तापितं च सद् गर्भवासमिव अनुभवति स्म । तदनु परिपूर्णे काले तद् अण्डकद्वयं झटिति स्फुटितम्, तस्माद् आवां बालौ समुद्भूतौ । परं स्वरूपेण ईदृशौ–फेनराशि-श्रीखण्डादिवद् धवलौ, आकाशचारिणौ, चरणायुधौ, स्वजातिपोषणे तत्परौ, युद्धबुद्धिस्थिरचित्तौ, कालज्ञानविदौ इव प्रतिप्रहरवाचालौ चेति । भो राजन् ! तादृशीं गतिं प्राप्ताभ्याम् आवाभ्यां बहूनि कीटककुटुम्बानि विनाश्यन्ते स्म । अहह ! मांसभक्षणेनैव आवयोस्तैरश्चं विजृम्भितम्, तैरश्चे पुनर्यत् कर्म चक्रे तद् ऋणार्थं भावि ! यतो दुर्गतिं प्राप्तो जीवः पापान्येव समाचरेत्, तेन पुनः पशुर्भवेत्, तत्र पुनः पापी, ततः पुनः पशुरित्येवम् अस्य शृङ्खलायोगस्य पारं प्राप्तुं न शक्यते, कर्म्मणां दुर्जयत्वाद्, जन्तूनां च प्रमादित्वात् । इत्येवम् आवयोः पक्षिणोर्दुस्तरं कष्टसमुद्रं पतितयोः पापव्यापारमयाः धर्म्मक्रियाहीनाः कर्म्माधीनाः केऽपि दिवसा ययुः । अथैकदा मृगयाशास्त्रकोविदश्चर्म्मवस्त्रधरो विरूपाक्षोऽणुहल्लो नाम मत्तो मातङ्गपुत्रः कर्मधर्म्मसद्भावाद् आवां प्रफुल्लाक्षः सन् पश्यति स्म । ततस्तेन सानन्दं स्वीकृत्य परिपालनं कुर्वता पुण्यं

तारुण्यं प्रापितौ, पारितोषिकद्रव्यलोभेन च कालदण्डनाम्नः कोट्टपालस्य प्राभृतीकृतौ। सोऽपि राज्ञो हृदयाभिज्ञः कोट्टपालो ममैव पूर्वपुत्रस्य तस्य गुणधरनृपस्य क्वचिदवसरे दर्शयामास। तदा स भूपोऽपि एकाग्रदृष्टयाऽऽवां विलोकमान इत्थं स्तौति स्म—'अहो! अस्माभिः एतादृशं कर्पूरपुञ्ज-चन्द्रकिरणतुल्यश्वेत-वर्णं पक्षियुगलं क्वापि न दृष्टम्। पुनरेतद् अस्माकं नेत्रकुमुदकलिके सुधाधाराभिर्निषिञ्चति, ततो यत्र यत्र वयं यामस्तत्र तत्र इदं पक्षियुगं त्वया सहानेतव्यम्' इति कालदण्डं समादिशति स्म। तदनन्तरं भो राजन्! स कोट्टपालो नृपाज्ञया अन्तःपुर-गृहा-ऽऽराम-मृगयादिषु क्रीडार्थं सर्वदा राज्ञा सह आवां गृह्णाति स्म। अथैकदा समुत्सुकपान्थजनकामिनीघनमनोरथसाधनतत्परः कोकिलावचनमाधुर्यशिक्षागुरुः शृङ्गार-रसमयो वसन्तसमयः समाययौ। तदा साऽन्तःपुरपरिवारो राजा वनराजीनां रम्याः कुसुमसम्पदो द्रष्टुं नगराद् निर्ययौ। तेषु च विचित्रपुष्पगन्धिषु वनेषु स राजा वाराङ्गनाभिः सार्धं स्वेच्छया विजहार। तदानीं ताल-तमाल-हिन्ताल-शाल-माल्लूरैः कदम्ब-निम्ब-जम्बू-निम्बू-जम्बीरैः करीर-करवीर-वानीरैः पुन्नाग-नाग-नारङ्ग-नागकेसरैः प्रियालु-पीलु-पनस-प्लक्ष-पाटला-केतकी-कुन्द-वासन्ती-शतपत्र-पङ्कज-कङ्केल्लि-मल्लिका-सहकारादिभिश्च पुष्प-फल-मञ्जरीसमृद्धैर्विविधवृक्षैर्विराजितास्ता वनराजयस्तस्य राज्ञश्चित्तम् अत्यन्तं रञ्जयामासुः। ततः स कौतुकप्रियो भूपतिस्तत्र सुगन्धिपुष्पाऽवचयकरण-पुष्पमालाग्रथन-विलोलदोलाखेलनादिविविधक्रीडां कुर्वन् स्वेच्छया चिरं विहृत्य श्रान्तः सन् सानन्दं नन्दिद्रुमवेदिकायाम् उपवि-

शति स्म । तदा सेवकवर्गो नानाविधानि मधुराणि मनोहराणि सौरभ्यवन्ति सरसानि पचेलिमानि वर्णोज्ज्वलानि विपुलानि फलानि सुपुष्पाणि च अहमहमिकया आनीय नृपाग्रे ढौकयन्ति स्म । नृपश्च अशनं पानं खाद्यं स्वाद्यं च फलादि स्वमित्रैः सह आस्वाद्य, मैथुनाभिलाषी सन् वधूयुक्तस्तत्रत्यप्रासादाऽपवारिकां प्रविश्य जयावलीं देवीं रन्तुं प्रावर्तत । तदा समीपस्था दास्यस्ताम्बूल-तालवृन्त-चन्दन-कुसुमादीनि सज्जयन्त्यो मदनोन्मत्तं तं नृपं सिषेविरे ! ।

अथ स राजा कामक्रीडारतो यावत् तत्र तिष्ठति तावद् आवां गृहीत्वा कालदण्डः समागतः । स च नृपं मैथुनव्यापारे लग्नं ज्ञात्वाऽप्राप्तसेवाऽवसरो वनान्तरे बभ्राम । तत्र च इतस्ततः प्रफुल्लितं वृक्षादि पश्यता स्वेच्छया परिभ्रमता तेन एकः शशिप्रभनामा आचार्यो दृष्टः । तं च एकान्ते शालवृक्षमूले कायोत्सर्गेण स्थितं स्थिरं महाधैर्यं संतुष्टं तपस्विनं दृष्ट्वा स कोट्टपालश्चिन्तयामास–'अहो ! एष कश्चित् श्वेताम्बरो योगी जितेन्द्रियो वैराग्यप्रधानां मनोज्ञां मुद्रां दधानस्तपस्तप्यमानः कुतोऽपि इह आयातोऽस्ति, अतः क्षणम् एतस्य समीपे उपविश्य श्रूयतेऽस्यापि कीदृग्धर्मानुशासनम्' । इति विचिन्त्य स तत्रागत्य तं मुनिं मस्तकेन द्रव्यतः प्रणमति स्म । यतो राजसेवकाः प्रायो बाह्यवृत्त्याऽपि विनीता भवन्त्येव । अथ अवसरज्ञः स मुनिरपि मौनं मुक्त्वा तं धर्माशिषाऽभिनन्द्य तेन सह धर्मगोष्ठिं चकार । ततः क्षणान्तरे स कालदण्डस्तं मुनिं पप्रच्छ–'हे भगवन् ! मम कथ्यतां को धर्मः ?' । तदाऽनया बहिर्मुखया वाण्या तं मि-

थ्यादृष्टिमिव ज्ञात्वा मुनिस्तत्त्ववाण्या उवाच–"भो राजपुत्र ! त्वं यद् मां 'स्वधर्मं ब्रूत' इति वदसि तत् किं लोके धर्मा अनेके सन्तीति जानासि? । हे नृपसभानिषेवक! तवापि ईदृशो मतिभ्रमो विद्यते येन एवं पृच्छसि ? । परमार्थतः किल एक एव धर्मोऽस्ति, भिन्नो धर्मः कोऽपि न विद्यते । यत् पुनः अयम् अस्य, अयं परस्य, अयं तव, अयं च मम धर्मोऽस्ति इत्येवं विभज्य लोकैरेकोऽपि धर्मः शतखण्डितः क्रियते तद् अज्ञानविजृम्भितम् अवबुध्यस्व । यतः सर्वेऽपि आगमाः प्रायस्तत्त्वमेव अनुवर्तन्ते, यथा सरलैः कुटिलैर्वा मार्गैर्गङ्गादिजलानां समुद्र एव गतिरस्ति । पुनर्वेष-भाषादिभिर्भेदे सत्यपि सर्वेषां लिङ्गिनां प्रायस्तत्त्वम् एकमेव, यथा श्याम-गौर-ताम्राणामपि धेनूनां पयः स्वादु धवलमेव च सम्भवति । तस्माद् हे राजवंश्य! परमार्थतो विद्या-वेष-भाषा-जन्म-कुल-विक्रमादिभिर्न किमपि सिध्यति, किन्तु शुभाऽशुभैः कृत्यैरेव जीवो धार्मिकः पातकी च संपद्यते। तत्र यः सम्यक्त्वम् अङ्गीकृत्य अहिंसा-सत्या-ऽस्तेय-सुशीला-ऽपरिग्रहादिव्रतधर्मं सम्यक् परिपालयति तमेव धार्मिकं जानीहि । पुनर्यथा चक्षुष्मान् पुमानेव सदसद्मार्गदर्शने निपुणो भवति तथा सम्यग्दृष्टिरेव तत्त्वतो धर्माऽधर्मौ जानाति, न तु अपरः । मिथ्यादृष्टयस्तु अधर्ममपि धर्मं श्रद्दधानाः संसारकान्तारेऽनन्तशः परिभ्रमन्ति, यतः सुकृतबुद्ध्या कृतमपि दुष्कृतं दुःखदायकमेव संपद्यते । उक्तञ्च—

"दुष्कृतं सुकृतप्रीत्या कृतमप्यसुखं दिशेत् । पुष्पदामधिया स्पृष्टो न किं दशति पन्नगः ? ॥ १॥

धर्मस्य दुरितस्यापि पर्यन्ते महदन्तरम् । अन्यदेव फलं यस्माद् माकन्द-पिचुमन्दयोः" ॥ २ ॥

पुनर्मिथ्यादृष्टयो हि आगमाभिप्रायम् अजानानाः सततं पुण्यार्थं पापमेव कुर्वन्ति । तथाहि—कौला मन्दबुद्धयो धर्मार्थम् अभक्ष्यभक्षणादिकुकर्म कुर्वन्ति, ब्राह्मणाश्च विविधजीवहिंसारूपं यज्ञं कुर्वन्ति, भिल्लास्तु दवानलं प्रददते, अन्ये पुनः केचिद् मृत्तिकादिस्नान-गोदान-सान्ध्य-पञ्चाग्निसाधन-द्रुमसेवा-वृषभविवाहादिकं तत्त्वतोऽधर्ममपि धर्मबुद्ध्या कुर्वन्ति । पुनर्ये मद्य-मांस-मातङ्गीसङ्गमैकाकारकारिणः कौलास्तेषां तु म्लेच्छानामिव नामाऽपि सताम् अग्राह्यम् अस्ति । भोः कालदण्ड ! एवं सर्वेऽपि दुर्मतयः स्वं स्वं शास्त्रम् आश्रित्य सर्वं कुकर्मैव आचरन्ति, परम् अन्तरङ्गदृष्टिरहिततया बहिरङ्गाऽवलोकिनः सन्तः शास्त्राभिप्रायं न जानन्ति । यतः परमार्थस्य कोऽपि सन्मार्गोऽन्य एवाऽस्ति, स च मूढात्मनाम् अगम्य एव । तथाहि—

"कालो भक्ष्यः कलाः पेया अगम्यं परमं पदम् । एकाकारं च सिद्धत्वं लोलाः कौलाः कथं विदुः ? ॥ १ ॥

सर्वेऽपीत्थं च पञ्चाग्नि-यज्ञ-स्नान-गवादयः । मूर्खैर्लाक्षणिकाः शब्दा वाचकत्वेन कल्पिताः" ॥ २ ॥

भो देवानुप्रिय ! इत्थं तत्त्वदृष्ट्या चिन्त्यमानं सांसारिकाऽन्धकारं क्व ?, पुनर्ज्ञानप्रदीपः क्व ? । यस्माद् विष-पीयूषयोरिव तयोर्महदन्तरं विद्यते । प्रायः सर्वमपि एतज्जगद् ज्ञाननावम् अलब्ध्वा गुरुद्वीपं च परित्यज्य अविद्याजालजम्बाले मग्नं सत् सर्वदा विषीदति । यस्मात् सर्वलोके विस्तृतं मिथ्यात्वम् अतुलान्ध-



१ आम्र-निम्बयोरित्यर्थः ।

कारं सूर्य-चन्द्र-विद्युत्-प्रदीप-वह्नि-चन्द्रमण्यादिना केनापि प्रकाशकवस्तुना पराभवितुं न शक्यते, ज्ञानमेव एकं तत्पराभवने क्षमं विद्यते । अहो कालदण्ड ! त्वया एकं स्वधर्मं पृष्टेन मया तव पुरः कथ्यमानम् इत्थं सर्वधर्मार्थकीर्तनं निशम्यताम्—पुनश्च, यः पुमान् तात्त्विकः सकरुणः प्रियंवदो निःस्पृहः शुचिरकिञ्चनश्च भवेत् तमेव लोके धार्मिकोत्तमं वदन्ति । एष एव भवतां सर्वेषां चिरन्तनो धर्मोऽस्ति" । अथैवं श्रुत्वा कालदण्डो विस्मितः सन् ईषद् विहस्य मुनिमुवाच—"हे भगवन् ! भवन्तं तत्त्वतो गोमुखव्याघ्रं जानामि । अहो ! भवतो वाण्यो निर्भरगम्भीरा विद्यन्ते, यतो भवता मह्यं धर्ममार्गं वक्तुमिच्छता ऐकमत्यमिवानीतम्, स्वजनत्वमिव च प्रादुष्कृतम् । तथाऽहं निरुत्तरीकृतः, स्वधर्मः प्रकाशितः, परधर्मश्च दूरीकृतः, विरोधश्चापि न दर्शितः । तस्माद् भो मुनिपुङ्गव ! इत्थं सर्वाऽभिमतं हितकारकं स्वसम्बद्धं च वचो वक्तुं वागीश्वरोऽपि सन् त्वत्तोऽपरः को वेत्ति ? । पुनर्हे भगवन् ! बहुलान्धकारमुद्रितपङ्कजराजिविकाशने सूर्यस्य इव तव मुग्धबुद्धिलोकप्रबोधने साधुरुद्यमो वर्तते । हे महापुरुष ! मयापि निश्चितमेव तद् यद् भवतोक्तं तत् तथैव, इदम् अन्यथा न भवत्येव । यतश्चिरन्तनो धर्मोऽपि अधर्मोऽपि च एक एवास्ति, न तु बहुभेदः । उक्तं च शास्त्रेऽपि—

"अहिंसामचलो वीरः सत्यं राजा युधिष्ठिरः । अस्तेयं मुनिवाल्मीकिर्ब्रह्मचर्यं च नारदः ॥ १ ॥
त्यागं विदेहभूपालः पालयामासिवानिति । ते स्वर्गमपवर्गं च लेभिरे पुरुषोत्तमाः ॥ २ ॥

अहिंसा सत्यमस्तेयं सुशीलमपरिग्रहः । पञ्चाङ्ग एष लोकानामाधारो धर्मपादपः ॥ ३ ॥
भयेऽपि च महासत्त्वा निःसङ्गा मौनिनः स्थिराः । शीर्णपर्ण-फलाहाराः समाधौ मग्नचेतसः ॥ ४ ॥
समानाः शत्रु-मित्रेषु पद्मात्रमहीस्पृशः । परोपकारप्रवणा निरग्निशरणाः सदा ॥ ५ ॥
अनेनैव हि धर्मेण शाश्वतेन महौजसा । आसेविरे ध्रुवं सिद्धिं कोटिसङ्ख्या महर्षयः ॥ ६ ॥
जीवघातो मृषाऽदत्तं पारदार्यं परिग्रहः । पञ्चेन्द्रियाणि पापस्य मिथ्यात्वं प्राणपञ्चकम् ॥ ७ ॥
हिंसया नहुषो राजा असत्येन वसुर्नृपः । चौर्येण कुण्डलो नागः पारदार्येण रावणः ॥ ८ ॥
राजा परिग्रहेणैलः कष्टं लेभे महत्तरम् । निःशेषिता गुणाः सर्वे एभिरेवाऽपरेऽपि हि" ॥ ९ ॥

इत्यादि । ततो हे मुनीश्वर ! अद्य मे सुप्रभातं जातं यद् अकस्माद् भवादृशां सत्पुरुषाणां दर्शनम् अभूत् । अनया धर्मगोष्ठ्या च मम मनोऽतीव पातकेभ्यो विरक्तीभूतम् अस्ति, तस्माद् भो भगवन् ! अतः परं कुलक्रमागताम् एकां हिंसां विना अन्येभ्यः सर्वेभ्योऽपि पापेभ्योऽहं निवृत्तोऽस्मि । यतोऽस्माकं कुले कुलदेवीनाम् अर्चनं प्रायोऽवश्यं प्राणिघातेनैव कर्तव्यम्, तत्तु मया त्यक्तुं न शक्यते; यस्माद् अहं क्षत्रियकुले उत्पन्नो गृहस्थो राजाधीनश्च अस्मि, परं हे योगीन्द्र ! त्वमिव स्वाधीनो न ह्यस्मि, अतस्तां हिंसां विनाऽन्यत् पापं न करिष्ये" । ततो शशिप्रभो नाम मुनीश्वरो हसन्निव प्रोवाच–'हे कालदण्ड ! त्वामहं पृच्छामि–त्वया किं पापं वर्जितम् ?। जलमग्नः पुमान् किम् अस्नात उच्यते ?, पुनर्भुक्तः

पुमान् किम् उपोषितः स्यात् ?, तथा हिंसकः पुमान् किम् अपापी भवेत् ?, अहं तव विचारं न जानामि । पुनर्भो देवानुप्रिय ! यदि हिंसां न मुञ्चसि तर्हि पापान्तरत्यागैः किम् ?, यतो हिंसकस्य पुंसो धर्मसम्भव एव नास्ति । उक्तञ्च—

"हिंसकस्य कुतो धर्मः कामुकस्य कुतः श्रुतम् ? । दाम्भिकस्य कुतः सत्यं तृष्णार्तस्य कुतो रतिः ? ॥ १ ॥
विना जीवदयामेकां सम्पूर्णावयवोऽपि सन् । विकलः सकलो धर्मः शरीरं चेतनामिव" ॥ २ ॥

अन्यच्च शृणु—यानि तत्त्वान्तराणि सन्ति तानि सर्वाण्यपि केवलं दयाया एव परिकरभूतानि, यथा शाकादिः सर्वोऽपि ओदनादिभोजनस्यैव उपस्करोऽस्ति । तथाहि—मृषावादेन किल जन्तवः पीड्यन्ते, अतोऽमृषाभाषणं तत्त्वतोऽहिंसैव । तथा यस्य द्रव्यम् अपहियते स प्राणी तद्दुःखदुःखितोऽत्यन्तं रोदिति क्रन्दति म्रियते च, तस्माद् अदत्तादानवर्जनमपि तत्त्वतोऽहिंसैव । तथा मैथुनसेवया प्राणी योनियन्त्रोत्पन्नान् बहून् त्रसजीवान् क्षणादेव विनाशयति, तस्माद् ब्रह्मचर्यपालनमपि तत्त्वतोऽहिंसैव । एवम् अन्यैरपि परिग्रहविरमण-रात्रिभोजननिवृत्त्यादिभिर्व्रतोपायैः परमार्थतोऽहिंसैव साध्यते । ताम् अहिंसां परित्यजतस्ते को धर्मो भविष्यति ? । दयायां किल सर्वेऽपि गुणा लीनाः सन्ति । उक्तञ्च—

"तरङ्गा इव पाथोधौ[1] निःश्वासा इव मारुते[2] । तारका इव मार्तण्डे[3] दयायां लिल्यरे गुणाः" ॥ १ ॥

---

१ समुद्रे । २ वायौ । ३ सूर्ये ।

पुनर्भोः कालदण्ड ! यदि त्वं परम्परागता हिंसा न विमुञ्चसि तर्हि पैतृकान् रोगान् कथं न स्वीकरोषि ? । तथा पुनर्विचिन्तय, यदि नाम परम्पराऽऽयातं दारिद्र्यं त्यज्यते तर्हि हिंसां त्यजतस्ते सा क्व कण्ठेऽलम्बते ? । अन्यच्च, आत्महितं धर्मं कुर्वन् कोऽपि केनापि न वार्यते, यथा गाधिपुत्रो मुनिर्भवन् किं क्षत्रियैर्निषिद्धः ? । पुनर्हिंसकस्य कुले उत्पन्नः किं हिंसक एव स्याद् ?, अहिंसको न स्यात् ?, यथा अन्धेन जातः पुत्रः किम् अन्ध एव भवेत् ? इति विचिन्तय । अपरमपि च शृणु—केन सर्वसंसारवैरिणा तव इदमुपदिष्टं यद् निरपराधजीवघातेन देवीपूजनं भवेत् ?, यतो जीवघातेन न च देव्यो न च देहिनस्तुष्यन्ति । अहिंसया किल सर्वेऽपि देवादयः प्रमुदिता भवेयुः । तथा तव कुलदेव्यो यस्य महेश्वरस्य पत्न्यः सन्ति तस्य रुद्रस्य प्रासादे हि जीवघातवार्ताऽपि नास्ति, तत्पत्नीनां देवीनां तु मद्य-मांसेन तर्पणम् इति पतिधर्मविरोधिन्यो देव्यः ! । साधु साधु पतिव्रता दृश्यन्ते ! । तथा 'यत्र जीवस्तत्र शिवः, सर्वं विष्णुमयं जगद्' इत्यादिवाक्यैः शैवैर्वैष्णवैरपि च अहिंसैव विस्तारिताऽस्ति । अतोऽहिंसैव सर्वमान्या विद्यते । अन्यदेव्यो हि सरस्वती-लक्ष्मीप्रभृतयः सौम्या वरप्रदा लोके प्रसिद्धाः सन्ति, ततो यासां जीववधः प्रियस्ताः पुनरिमा दुष्टा डाकिनी-शाकिनी-राक्षसीप्रायाः का देव्यः ? । पुनर्भोः कालदण्ड ! इदम् अन्यदपि शृणु—किम् अनेन तव देवीपूजनोत्सवेन ?, यतो भाग्यैर्विना देव्योऽपि न सिध्यन्ति । उक्तञ्च—

"फलन्ति भागधेयानि निमित्तं देवतादयः । निष्पुण्याः कति न त्यक्ता देवीभिः साधकाः किल" ? ॥ १ ॥

तस्माद् बुद्धिमता देवान्तरं विहाय सर्वमनश्चिन्तितार्थदायकः सर्वदेवाधिकः परमात्माऽभिन्नः शुद्धस्वरूप आत्मैव साध्यः, यस्मात् क्रमेण परमानन्दसम्पदः प्रादुर्भवेयुः । यदवादि—

"स्वाधीनः शाश्वतो विष्णुः सर्वज्ञः सर्वकामदः । यदात्माऽऽराधितः कुर्याद् न तद्दैवतकोटयः" ॥ १ ॥

मूर्खप्राणिभिस्तु च्छलग्राहीणि दुष्टानि स्वभावतः कृपणानि च दैवतानि साध्यन्ते, परं न सर्वशुद्ध आत्मा । तथा पुत्र-कलत्रादिवाञ्छयापि लोका देवताराधनं कुर्वन्ति, परं कतिपुत्रैः कतिकलत्रैश्च ते पित्रादयो न प्रलयं प्रापिताः ? इति न जानन्ति । तेषाम् अज्ञानिनां पुनः पुत्र-कलत्रादिषु महामोहदुर्दिनं प्रवर्तते यैर्महेश्वरदत्तादीनां कथा न श्रुता । तत्र महेश्वरदत्तवृत्तान्तस्तु एवम्—

## ॥ महेश्वरदत्तकथा ॥

तामलिप्त्यां नगर्यां महेश्वरदत्तो नाम श्रीमान् सार्थवाहोऽभूत् । तस्य च द्रव्येषु सर्वदाऽतृप्तः समुद्रो नाम पिता संजज्ञे, मायाप्रपञ्चबहुला बहुला नाम च माताऽभवत् । अथ द्रव्यसञ्चयकरणव्यसनी स तस्य पिता समुद्रः कदाचिदायुःक्षये मृत्वा तत्रैव देशे महिषः संजातः । तदा पत्युर्मरणाद् आर्तध्यानाऽग्निना दग्धा तस्य माताऽपि विपद्य तत्रैव नगरे शुनी बभूव । तस्यैव च महेश्वरदत्तस्य अद्भुतरूप-सौभाग्यधा-

रिणी गाङ्गिला नाम पत्नी अभूत्। सा च महेश्वरस्य[1] गौरीव बभौ। अथ कियद्भिर्वासरैः[2] स्वभावतश्चञ्चला सा गाङ्गिला श्वश्रू-श्वशुरहीना एकाकिनी गृहे वसन्ती स्वेच्छाचारिणी अभवत्। ततः सर्वदा पतिं वञ्च्यमाना सा व्यभिचारिणी परपुरुषेण सह रमते स्म, यत एकाकिनीनां नारीणां प्रायः सतीत्वं कियत्कालं तिष्ठति ?। अथैकदा तस्यां परपुरुषेण सह निरङ्कुशं रममाणायां सत्याम् अकस्माद् गृहद्वारे महेश्वरदत्तः समागात्। तदा तम् आगतं दृष्ट्वा तौ असती-जारौ विकीर्णकुन्तलौ सुरतप्रयासेन भयेन च कम्पमानजङ्घौ उद्भ्रान्तलोचनौ परावर्तिताऽधरीयवस्त्रौ अगृहीतोत्तरीयवस्त्रौ नग्नप्रायौ स्खलत्पादौ च सन्तौ भयद्रुतौ बभूवतुः। ततो महेश्वरदत्तस्तद्वृत्तान्ताऽवलोकनात् कोपाक्रान्तः सन् तं जारं केशेषु धृत्वा मान्त्रिको भूतार्तमिव चपेटाभिर्जघान, पुनः कुम्भकारो मृत्पिण्डमिव पादप्रहारैर्ममर्द, गृहे प्रविष्टं कुर्कुरमिव यष्ट्या च अताडयत्। किं बहुना ?, तं बहुभिः प्रकारैर्हत्वा क्षणाद् मृतमिव चक्रे, यतो मनस्विनां पुरुषाणां चौरे न तथा कोपो यथा जारे कोपः समुत्पद्यते। अथ यमसहोदरेण इव रुष्टेन महेश्वरेण अर्धमारितोऽपि स जारः कथमपि प्रणश्य स्तोकं च गत्वा कण्ठगतप्राणः सन् इदम् अचिन्तयत्–'धिग् धिग् मां मूढम्, यदहं मर्तुमिच्छुरेव ईदृग् निन्दितं कर्म अकार्षम्, तच्च कामदं तीर्थमिव युक्तमेव सद्यो मम मरणायाऽभवत्'। एवं चिन्तयन्नेव स जारस्तत्कालं मृत्वा प्राग्भुक्तगाङ्गिलाकुक्षौ स्वबीजे[3] एव पुत्रत्वेन उत्पन्नः।

१ शङ्करस्य। २ दिवसैः। ३ स्ववीर्ये।

गाङ्गिला च पूर्णे काले पुत्रं सुषुवे । अथ महेश्वरदत्तो जारजम् अपि आत्मजनितं मन्वानस्तं पुत्रं विविधलीलयाऽलालयत् । प्रसूतपुत्रायास्तस्या गाङ्गिलायाः स्पष्टं दृष्टमपि असतीदोषं पुत्रप्रीत्या व्यस्मरत् । तथा प्रमुदितः सन् पुत्रस्वरूपं प्राप्तस्य तस्य जारजीवस्य धात्रीकर्माणि कुर्वाणो न लज्जते स्म । पुनर्वर्धमानं कूर्चकेशाऽऽकर्षकं तं बालं कृपणो द्रव्यमिव सदा हृदयाग्रे स्थितं धारयामास ।

एकदा पितुर्मरणदिने प्राप्ते सति स महेश्वरो मांसेच्छया तं पितृजीवं महिषं क्रीणाति स्म । ततः पितृवासरपर्वार्थं स स्वयमेव तं महिषं मारयित्वा आनन्दितः सन् तन्मांसं ग्रासीकुर्वाण उत्सङ्गस्थाय बालायाऽपि ददौ । तस्मिन् अवसरे तन्माता शुनी अपि मांसलुब्धा तत्राजगाम । तदा सोपि तदर्थं समांसानि अस्थिखण्डानि चिक्षेप । ततो वातप्रेरितधूमशिखाप्रवत् पुच्छं नर्तयन्ती सा स्वकीयपतिजीवस्य अस्थीनि भक्षयामास । अथ पितृमांसं खादतो महेश्वरस्य गृहे मासक्षपणपारणार्थं कुतश्चिद् एको महामुनिः समाजगाम । स च ज्ञानाऽतिशयसंपन्नत्वाद् महेश्वरदत्तस्य तादृशं सर्वं वृत्तान्तं ज्ञात्वा चिन्तयामास—'अहो ! धिग् अस्याऽज्ञानं यत् पितुर्मांसमश्नाति !, उत्सङ्गे च वैरिणं दधाति !। इयं पार्श्वस्था शुनी पुनः प्रमुदिता सती पत्युः समांसानि अस्थीनि खादति । अहो! ईदृशोऽयं संसारो विद्यते' । एवं सम्यग् ज्ञात्वा स मुनिस्तद्गृहात् सद्यो निर्गत्य यावद् बहिरागतस्तावद् महेश्वरोऽपि धावित्वा वन्दित्वा च तम् उवाच—'हे भगवन्! भिक्षाम् अगृहीत्वैव मद्गृहात् कथं निवृत्तोऽसि ?। न हि अहम् अभक्तोऽस्मि, नापि भवदवज्ञाम्

अकार्षम्, प्रत्युत भवद्दर्शनाद् हर्षितोऽस्मि'। तदा मुनिर्जगाद–'भो भद्र! मांसभक्षकस्य गृहेऽहम् आहारं न गृह्णामि, तस्माद् मया त्वद्गृहे भिक्षा न गृहीता। पुनर्मम त्वद्गृहस्वरूपदर्शनाद् महान् संवेगोऽपि समुत्पन्नः'। तदा महेश्वरेण पृष्टम्–' स्वामिन् ! किं कारणम् ?' । ततो मुनिरपि तदग्रे महिष-शुनी-पुत्रादीनां यथावस्थितकथां कथयामास । तदा 'कोऽपि प्रत्ययः ?' इति पुनर्महेश्वरेणोक्ते मुनिरुवाच–'अहो ! इमां शुनीं प्रति प्राग् भूमौ निखातं किमपि पृच्छ' । अथ मुनिवचनात् तेन पृष्टा सा शुनी अपि जातिस्मरणप्रभावतः स्वनिखातनिधानस्थानं चरणेन खनति स्म । ततस्तत्र निधानं दृष्ट्वा उत्पन्नप्रत्ययः स महेश्वरदत्तः सद्यः संसारोद्विग्नः सन् पात्रेषु सम्पदं दत्त्वा प्रव्रज्यां जग्राह । इति महेश्वरदत्ताख्यानकम् ।

"भोः कालदण्ड ! एष वृत्तान्तो येषां न कर्णगोचरीभूतस्ते मूढाः पुत्र-कलत्रादिमोहमग्ना अनेकशोऽकृत्यं कुर्वन्ति, दुष्टदेवादिकं च आराधयन्ति । तत्त्वज्ञानिनः पुनः कदापि एवं न कुर्वन्ति, किन्तु जीवदयादिनिमित्तं राज्य-पुत्र-कलत्रादिकम् अपि त्यजन्ति । तथाहि—

उग्रसेनस्य तनयां देवो जीवदयापरः । अरिष्टनेमिस्तत्याज प्रियां राजीमतीमपि ॥ १ ॥
गर्भिणीघातसंजातपातकध्वान्तशान्तये । तत्याज राजराजेन्द्रो हरिश्चन्द्रो महीमिति ॥ २ ॥

"तस्माद् भो महाभाग ! 'अहं क्षत्रियोऽस्मि' इति विचिन्त्य हिंसां मुञ्च, यतो निरपराधानां वधं धीवरा एव कुर्वन्ति, न तु क्षत्रियाः । इयं हिंसा पुनः प्राणिनां कालरात्रिरिव, वैतरणी नदी इव, कालाऽनलस्य

ज्वाला इव, किम्पाककन्दली इव महादुःखप्रदा विद्यते। तथा इयमेव साक्षाद् बीभत्स-भयानकरसयुक्तो रौद्रो रसो वर्तते। पुनः काचिद् महामायापि इयं हिंसैव निगद्यते। तथा कंसाद्या बलवन्तोऽपि कति पुरुषा हिंसामलिनचित्ताः सन्त आपदां पदं न जातास्तद् विचारय। पुनः स्वयं हिंसा तु दूरे तिष्ठतु, हिंसाया लेशोऽपि दुःखदायको भवति। यदुक्तम्—

"आस्तां दूरे स्वयं हिंसा हिंसालेशोऽपि दुःखदः। न केवलं विषं हन्ति तद्गन्धोऽपि हि दुःखदः" ॥ १ ॥

"तथा कलावती-मित्रानन्दप्रमुखैर्जीवैः अल्पया हिंसया एव दुस्तरो दुःखसागरः संप्राप्तः, दृढप्रहारि-चिलातीपुत्रादिभिस्तु महापापिभिरपि सद्गुरुसंयोगात् सद्यो हिंसां परित्यज्य परमं पदं संप्राप्तम्। तस्माद् भोः कालदण्ड! त्वमपि कदाग्रहं मुक्त्वा, सुमहान्तं मोहमहिषं हत्वा निजचित्तवृत्तिम् अन्तर्देवीं सदा प्रसन्नीकुरु। तव किम् अपरैर्निरपराधपशुप्रहारैः?, पुनरपराभिः सेविताभिर्देवताभिरनर्थहेतुभिः?। यदि त्वम् एनं महोपद्रवमयं जीवघातं नो विमुञ्चसि ततः परिणामकाले अस्य कुर्कुटयुगलस्य इव तवापि गतिर्भविष्यति"। तदा कालदण्डो विस्मितः सन् मुनिं प्रति पप्रच्छ–'हे स्वामिन्! इमौ द्वौ कौ प्राग् अभूताम्?, किं च आभ्याम् अकारि?, कोऽयं वृत्तान्तः?'। तदा मुनीश्वरस्तत् पिष्टमयकुर्कुटहननादिकं सर्वमपि आमूलचूलम् आवयोश्चरितं तदग्रे जगाद। ततो यथा किल मम राज्यम् आसीत्, यथा मातृ-सुतौ आस्ताम्; यथा च कालकूटप्रयोगाद् मम मृत्युर्जातः, यथा पुनरावां मयूर-श्वानौ नकुल-भुजङ्गौ मत्स्य-ग्राहौ

अज-मेषौ मेष-महिषौ कुर्कुट-कुर्कुट्यौ च भूतौ तथा सर्वं स्ववृत्तान्तं श्रुत्वा जातिस्मरणं प्राप्य आवां कूजन्तौ मुनेः पादयोः पतितौ। ततश्च आरटन्तौ चकितौ भ्रान्तौ भीतौ कम्पमानौ लुठन्तौ प्राग्जन्म स्मरन्तौ च आवां तथाभूतौ दृष्ट्वा अवसरज्ञः शान्तसन्तापः कालदण्ड उवाच–'हे राजन् सुरेन्द्रदत्त ! त्वं कथं कुर्कुटो जातोऽसि ?, तथा हे मातश्चन्द्रमति ! त्वं किम् इमां दशां प्राप्ताऽसि ?। पुनर्हे मालवभूपाल ! इन्द्रतुल्य-पराक्रमस्त्वं क्व ?, इदं पुनः कुर्कुटजन्म क्व ?। अहो भवितव्यतायाः प्रबलता !। हे स्वामिन् ! तव ईदृग्दशां दृष्ट्वा मम मनोऽतीव दूयते, परं हे महाराज ! मा विषीद्, अलं तव रोदनेन, यतः सारवर्जितोऽयं संसारः। सत्यम्, ईदृश एवास्ति। तव पुत्र-मित्र-कलत्राणि सम्बन्धि-बान्धवाश्च सर्वमपि एतत् तथैव आस्ते, त्वं पुनरेकोऽन्यथा दृश्यसे !। अथ यत् त्वम् इच्छसि तद् मामेव आदिश, अयं तव प्रसादपात्रं कालदण्डः किं करोतु ?। हे देव ! शिरसः संज्ञया त्वं मम वाणीं प्रतीच्छसि, परं स्वभाषाभिर्यद् ब्रवीषि तदर्थम् अहं न जानामि"। तत आचार्यस्तम् उवाच–'हे आयुष्मन् ! त्वं किं न जानासि ?, एतौ तव स्वामिनौ कुर्कुटौ अनशनं याचेते। अन्तर्मुहूर्तमात्रेण अनयोर्मृत्युर्भविष्यति, तस्मात् परलोकं गच्छतोरेनयोर्धर्मशम्बलं देयम्'। इत्युक्त्वा स मुनीन्द्रोऽनशनं दत्त्वा चतुःशरणपूर्वकं तौ सद्यः पर्यन्ताराधनं कारयामास। कालदण्डस्तु 'सज्जयोरनयोः कुतस्त्यो मृत्युर्भविष्यति ?' इति चिन्तयाऽन्तर्विस्मितः सन् तस्थौ। ततश्च आवां मुनेर्वाचा पापस्थाननिवृत्तिषु 'ओम्' इति कथनार्थं कूजन्तौ प्रासादमध्यस्थेन राज्ञा श्रुतौ। तदा एकान्त-

स्थितो राजा जयावलीं राज्ञीं प्रति प्रीत्या उवाच–'हे देवि! यदि तव चित्ते कौतुकमस्ति तर्हि मे शब्द-वेधित्वं पश्य'। एवम् उक्त्वा भूपतिः सद्यः सर्पशरीरवद् भयानकं क्रूरघोषं वज्रदण्डकर्कशं धनुर्गृहीत्वा निजनामाङ्कितं सर्वलोहमयम् एकं बाणं संदधे!। अत्रान्तरे दिव्यदृष्ट्या गुरुर्जगाद–'हे कालदण्ड! एषोऽनयोर्मृत्युर्वेगतः समायाति, त्वम् एतौ आकुलतरौ कुर्कुटौ परिरक्ष'। अथ स कोट्टपालो यावत् प्रतिदिशं पश्यति तावद् भूपतिना कुण्डलीकृतशरीराद् धनुषः स्वयं मुक्तो हुङ्कारस्वरभीषणस्तीक्ष्णमुखो बाणोऽज्ञातः सन् समागत्य आवयोः शरीरं भित्त्वा प्राणान् अपहृत्य दूरतरं च गत्वा पृथ्वीं प्रविवेश। हे राजन्! अहं स्वप्ने जनन्या प्रेरितो यद् धवलगृहतः षड्भूमीर्नीचैर्यातः, जनन्यपि च मदनुव्रजन्ती तत्रैव प्राप्ता, तद् एतन्मया सकलमपि अत्यन्तरौद्रं दुःस्वप्नफलम् इत्थं साक्षादनुभूतम्। यतस्तादृशे सुकृतविकले विवेकहीने तिर्यग्भवे आवयोः षड् भवा बभूवुः। इति श्रीयशोधरचरित्रे नृप-जनन्योः सप्तमो भवः।

---

## अथ अष्टमो भवः॥ ८॥

अथाऽनयोरष्टमभवस्वरूपं लिख्यते–अथ कालदण्डस्तम् अद्भुत-भयानक-रौद्र-वीर-बीभत्स- शान्त-करुणा-रसानुकूलं प्रबन्धं दृष्ट्वा सद्य उद्भ्रान्त-चञ्चल-निमीलित-भिन्न-खिन्न-प्रच्छन्नसाश्रुलोचनः समजनि। ततः सोऽ-

लसः श्रमवारिवर्षी रोमाञ्चितो नखमुखो निश्चलोऽनुशोचन् शिरो धूनयन् शुन्याकुलश्च सन् इत्युवाच–"अहह ! किमिदं मया इन्द्रजालं दृष्टम् ?, किं वा स्वप्नस्वरूपमनुभूतम् ?, किमेतत् पुनर्विषमं जातं यज्जातिस्मरणं प्राप्तौ इमौ अकस्माद् मृतौ !। किञ्च, एतावतोऽपि पापस्य यदि अनयोः कुर्कुटयोरयमीदृशो महान् कर्कशो विपाकः समुद्भूतस्तर्हि आजन्मतः पापकर्दममग्नो मादृशो वराकः क्व गतौ गमिष्यति ?। निरपराधबहुजीववधोद्धतेन मया तु निश्चितम् अयं ममात्मा तीव्रतरनरकदुःखानामेव पात्रीकृतः। अन्यच्च, यथा भुजबलादिगर्वितेन राज्ञा मुक्तस्य बाणस्य प्रयोगाद् बहिर्निःसृतानि पुरतः स्थितानि रुधिर-मांस-वसायुतानि अनयोः पक्षिणोरेतानि अन्त्राणि बीभत्सोत्पादकानि सन्ति तथा सर्वेषामपि शरीरबन्धो बहिः शुचिः अन्तः अशुचिश्च ईदृश एवास्ति; अहो ! एवंविधस्य मल-मूत्रगृहस्य रोगाकुलस्य विनश्वरस्य शरीरस्य निमित्तम् अज्ञानिनः पुरुषा भवकोटिकारणानि पापानि समाचरन्ति !"। पुनः कालदण्डो नृप-जनन्योः स्मरन् इत्युवाच–"हा मातश्चन्द्रमति देवि ! त्वं क्व दूरं गताऽसि ? हा देव सुरेन्द्रदत्त ! तव किं बभूव ?। हा हन्त ! कुर्कुटभवेऽपि मम युष्मत्संयोगं देवो न सहते स्म, अन्यथा कथम् अकस्माद्वियोगसंपादकं शरप्रहारं विदध्यात् ?"। एवं बहुधाऽनुशोच्य स कालदण्डश्चित्तं स्थिरीकृत्य मुनिं प्रत्युवाच–"हे स्वामिन् मुनीश्वर ! हे शरण्य ! सम्प्रति त्वमेव मम शरणं भव। अहं संसाराद् भीतः सन् स्वयमेव जीववधाद् निवृत्तोऽस्मि,

१ यशोधर।।

त्वामेव च नमस्यामि । पूर्वभवे मया निश्चितं किमपि उत्तमं सुकृतं कृतमभूद्, अन्यथा भवान् त्रिकालदर्शी मुनीश्वरो मम दृष्टिगोचरः कथमभविष्यत् ? । पुनर्हे स्वामिन् ! अकिञ्चनस्तत्त्वज्ञो भवादृशो यद् अपरिचितं धर्मपराङ्मुखं मादृशं जडं सन्मार्गे प्रापयति तदत्र सत्यं करुणैव कारणम् । अथ हे भगवन् ! तुभ्यं तपस्विने नमोऽस्तु । त्वं च करुणां विधाय मां निजकिङ्करं दुस्तराद् भवसमुद्रात् सद्यो निस्तारय" । ततो मुनीश्वरेणोक्तम्—'भो देवानुप्रिय ! शुद्धम् आत्मधर्ममङ्गीकुरु, येन तव शीघ्रमेव इष्टसिद्धिः संपद्यते' । ततः स कालदण्डो नृपदाण्डपाशिकस्तत्कालं गुरुवचनात् सम्यक्त्वमूलानि द्वादशव्रतानि गृहीत्वा तद्दिनादेव श्रमणोपासकः संजातः ।

अथ हे मारिदत्त ! स गुणधरो राजा आवां प्राग्भवपितरौ हत्वा स्वेच्छया तां जयावलीं देवीं बुभुजे, तस्यां साभिलाषायां स्ववीर्यं च स्थापयामास । ततः समाप्तसंभोगोऽपि स नृपस्तस्या लालित्यदर्शनात् पुनः संजाताभिलाषः सन् उत्तिष्ठन्तीं तां सुन्दरीम् आलिङ्ग्य शय्यां नीत्वा रतशेषं परिपूर्णीकृत्य गाढसंभोगशिथिलाम् अत्यन्तोद्भ्रान्तलोचनां वीर्यसंपूर्णां च सतीं तां मुमुचे । तत्र वीर्यद्वये च पुं-स्त्रीलिङ्गधरौ द्वावपि आवां जीवौ पुत्रवधूकुक्षौ क्षणात् संक्रान्तौ । अथ सा जयावली देवी दिने दिने कललादिक्रमेण वर्धमानम् अपत्यद्वयलक्षणं गर्भं सुखेन पालयामास । तदा मालवेश्वरः सीमन्तोन्नयनादीनि माङ्गल्यानि कार्याणि तया

१ शुक्रशोणितसन्निपात—गर्भवेष्टनादिक्रमेण ।

मनोज्ञभार्यया सह सस्नेहमन्वभूत् । अथ सा देवी शुभगर्भप्रभावतोऽतुच्छवाञ्छया सर्वजीवेभ्योऽभयदानादिदोहदं हृदये दधार । पुनर्निरन्तरं करुणार्द्रचेतसा सर्वानपि जीवान् सुख-दुःखेषु आत्मवद् ददर्श । तथा वल्लीषु क्षीरधारा इव, मृग-पक्ष्यादिजन्तुषु रक्षा इव, दरिद्रेषु च लक्ष्मीरिव तस्या दृष्टिः प्रवर्तते स्म । पुनः सा देवी कारागृहेभ्यो बन्दिजनान्, बन्धनेभ्यो मृगान्, पञ्जरेभ्यश्च पक्षिणः सर्वानपि तत्कालं मोचयामास । तथा स्वदेशेषु सर्वजलेषु सर्ववनेषु च शौनिककर्माणि मत्स्यबन्धनजालं वागुरां च निषेधयामास । पुनर्जीवदयाभिलाषिणी सा अन्येष्वपि तेषु तेषु वृक्षभङ्ग-विषविक्रयादिकार्येषु अनेकशः प्रयत्नान् कारयामास । किं बहुना ? द्यूतेऽपि सारीणां मारिनाम न्यवारयत् । तथा कस्तूरी-गोरोचन-हंसतूलिका-मयूरपिच्छच्छत्रादिकं किञ्चिदपि जीवाऽङ्गसमुत्पन्नं वस्तु तस्यै न रोचते स्म । ततः कदाचिद् राज्ञा पुनः पुनर्दोहदं पृच्छ्यमाना राज्ञी 'आखेटकनिवृत्त्यर्थं प्रसन्नो भव' इत्युवाच । तदा नृपोऽपि तद्दोहदाभिप्रायं ज्ञात्वा तद्वचनमङ्गीचकार, यतः सा देवी तस्यापि अनुल्लङ्घ्यवचना आसीत् । पुनर्भूपस्ताम् एकान्ते सखीनां गोष्ठीमध्ये प्रियंवदेति सौम्येति दयालुरिति वत्सलेति च प्रशंसति स्म । अथ सा राज्ञी निरन्तरं दानं ददती, देवपूजनं कुर्वती, गुरुसेवां वितन्वती, नरेश्वरं सन्तोषयन्ती, अतिनिद्रा-श्रम-शीतो-ष्ण-मृदुयोगं च विवर्जयन्ती, कटु-तिक्तादिवस्तुषु कौमारक्रियानिपुणैर्वैद्यवरैश्चिन्त्यमाना क्रमेण शुभवेलायां संपूर्णलक्षणयुतं मां पुत्रम् इमां

१ गर्भरक्षणक्रियाकुशलैः ।

च पुत्रीं सुखेन प्रासूत । तदा सकलमपि नगरं विकीर्णपुष्पप्रकरम् ऊर्ध्वीकृतपताकावृन्दं बन्दिजनपठ्यमान-
मङ्गलनादं च समभवत् । राजकुलं च बहुस्वजनसङ्कीर्णं विविधमाङ्गल्यैर्विराजितम् अनेकसधवस्त्रीगीयमान-
गीतं च समजनि । पुनस्तदा नृपाग्रतः पुत्रोत्पत्तिनिवेदकैर्जनैर्वाञ्छितादपि अधिकं द्रव्यं लेभे । ततो विनी[1]-
ताभिः पञ्च-सप्तधात्रीभिः प्रयत्नतः पाल्यमानौ द्वावपि आवां माता-पित्रोर्मनोरथैः सह क्रमेण वृद्धिं प्राप्तौ ।
अथ प्रतिदिनं परस्परमवियुक्तौ कन्दुकादिक्रीडाभिः स्वेच्छया रममाणौ आवां जयावली देवी 'हे वत्स
वीरकुलावतंस !, हे पुत्रि चन्द्रमुखि !' इत्याद्यालापैः सस्नेहमुल्लापयामास । तथा गुणधरपिता आवामालि-
ङ्ग्य उत्सङ्गमारोप्य स्वमुखात् ताम्बूलं दत्त्वा प्रियालापैरालापयत् । तदा आवामपि स्वस्मिन् तदपत्यबुद्ध्या
तं स्वपुत्रं ताततातेति तां पुत्रवधूं च मातर्मातरिति प्रकटमेव अवोचाव । ततो भूपालः पठनाभ्यासकाले
प्रसिद्धैर्विनीतैरप्रमादिभिरुपाध्यायैरावां सकला कला ग्राहयामास । आवामपि अचिरेण कालेन कलाभ्या-
सं विधाय क्रीडानदीपूरं बालत्वं क्रमेण दूरमुल्लङ्घ्य तरुणस्त्रीमनःक्रीडावनं यौवनं संप्राप्तौ । तदा सर्वेऽपि
लोकाः शरीरयोः सादृश्येन मां सुरेन्द्रदत्तमिव इमां च चन्द्रमतीमिव विलोक्य अत्यन्तमानन्दिता बभूवुः ।
नृपश्च मम यौवराज्याभिषेकाय एतस्याश्च स्वयंवराय निरन्तरं मनसा त्वरते स्म । भो राजन् ! इत्थं पुनरपि
मानुष्यं जन्म बद्ध्वा तस्य राज्ञोऽपत्यभावं प्राप्तयोरावयोः परमानन्दमयानि क्षणमिव वासराणि व्रजन्ति स्म ।

---

१ विनयवतीभिः ।

अथैकदा बहुवर्षातिक्रमे स मालवेन्द्रो गुणधरो नृपश्चण्डस्वभावतया भूयोऽपि धृतदुर्मतिः सन् मृगयार्थं प्रचचाल। तत्र चैवं चिन्तयामास–'अद्याहं त्यक्तराजकार्यभारो मुक्तसर्वपरिग्रहप्रसङ्गो हर्षितः सन् शीघ्रं सर्वं श्वापदं संहरामि। पुनरहोरात्रं वनान्तराले विचरन् शीता-ऽऽतप-वातवेदनाम् अगणयन् शयालुस्तरुमूलं भजन् विभोजनो धनुर्बाणधरोऽप्रमादी च सन् चिरकालम् अनेकपोषितानां विषयाणां परिवर्तनं करिष्ये'। अथैवं चिन्तयन् स भूपो मृगान्वेषी कण्ठार्पितधनुष्कश्च सन् वेगवताऽश्वेन तस्या मालवगङ्गायाः सिप्रानद्यास्तटे समन्ताद् बभ्राम। पिशाचा भैरवमिव श्वानयुक्ता व्याधा वागुरिकाश्च तम् अनुजग्मुः। ततो वल्गता गगनं गच्छता त्वरताऽत्यर्थं भ्रमता तुरङ्गेण स महावनम् अवगाहमानस्तत्र रसालवृक्षमूलस्थं मोहाऽन्धकारदिवाकरम् एकं मुनिपुङ्गवं ददर्श; परं यवासकाय वर्षा इव, घूकाय सूर्य इव तस्मै राज्ञे स मुनिरत्यर्थं न रुरुचे। तदा 'मृगयां गच्छतो मम अग्रत एवायं मुण्डो मलधारी पापी अशकुनो भवति' इत्येवं विचिन्त्य स पापी राजा भ्रूसंज्ञया तस्मिन् भगवति मुनीश्वरे बहून् कौलानां कुर्कुरान् अमोचयत्। 'वात्यावातैर्वृक्ष इव एभिः श्वभिरयं पापी अधुना पात्यते' इति बुद्ध्या तुष्टः सन् स्वयं नरेश्वरस्तमपश्यत्। अथ धनुषः शरा इव सहुङ्कारं विनिर्मुक्तास्ते दुरात्मानः श्वानो मुनीन्द्रसंमुखं धावन्ति स्म, परं सद्यस्तत्समीपं प्राप्य आज्ञामिव तस्य राजर्षेश्छायामपि न लङ्घन्ते स्म। तथा प्रचण्डसूर्य-

१ पुनरपि। २ वनपशुम्। ३ लुब्धकाः। ४ जालिकाः, जालेन मृगादिबन्धकाः। ५ रसाल आम्रः।

मिव, ज्वलन्तम् अग्निमिव च तं मुनिं ते श्वानः स्प्रष्टुं कुतः समर्थाः स्युः ?, द्रष्टुमपि न समर्था बभूवुः। किन्तु ते तिर्यञ्चोऽपि अतिसन्तुष्टाः सन्तस्तं मुनीन्द्रं त्रिः प्रदक्षिणीकृत्य लुलत्कर्णं नमत्पुच्छं लुठन्तः प्रणामं कृत्वा चाऽग्रतोमुखैश्चरणैः सर्वेऽपि तस्य पुरस्ताद् उपविशन्ति स्म। तदा राजाऽदृष्टपूर्वं तत्स्वरूपं दृष्ट्वा विस्मितः सन् इत्थं चिन्तयामास—"अहो! एतद् महाश्चर्यं वीक्ष्यते!, अमी कुर्कुराः कुत इमं मुनीन्द्र-मुपलक्षन्ते?, किं वाऽनेन एते स्तम्भिता जडिताः कीलिता वा, अन्यथा कथमेते दुष्टा अकस्मात् शान्तिं प्राप्ताः ?। पुनः प्रहारदानादिकं तु दूरे तिष्ठतु, प्रत्युत एष मुनिरेतैः श्वानैः पुरतः स्थितैर्दक्षैः शिष्यैरिव सेव्यते। अहो! अस्य भगवतः काचित् सिद्धिर्वाचामगोचरा दृष्टा यद् अस्य दर्शनाद् दुर्बुद्धीनां शुनामपि ईदृग् बोधः समुत्पन्नः!। पुनरमी मुनीश्वरा भिक्षुकत्वेऽपि भूपालाः, शान्तत्वेऽपि महाभटाः, कुचेलत्वे[1]ऽपि च सुभगा दर्शनीयाश्च सन्ति। तथाऽमी सर्वे श्वाना अपि सुलक्षणाः पुण्यवन्तश्च दृश्यन्ते, येषां तिर्यग्भवेऽपि अस्मिन् भगवति एवंविधाऽकृत्रिमा प्रीतिर्वरीवर्त्ति[2]। मां पुनर्महापराधकारिणं सुरेन्द्रदत्तस्य पुत्रं चण्डालेभ्योऽपि पापिनं वृथा भूपालं धिग् अस्तु। इह यस्य मम ईदृशं दुष्टचेष्टितं वर्तते सोऽहं चक्षुष्मानपि अन्धोऽस्मि, पञ्चेन्द्रियोऽपि पाषाणोऽस्मि, तथा मनुष्योऽपि शृगालोऽस्मि। पुनश्च, अरे जीव! व्याघ्रोऽपि मनुष्यं न हन्ति, म्लेच्छोऽपि प्रायो निरपराधं नरं न प्रहरति, त्वया पुनरियं मनुष्यमृगया कथ-

---

१ मलिनवस्त्रत्वेऽपि। २ अतिशयेन वर्तते।

मारब्धा ?। पुनर्येषां स्पर्शमात्रेण सूतकं भवति तान् कुर्कुरान् मनुष्ये कोऽपि मनुष्यो मुञ्चति ?, त्वया तु साक्षादेव तद् अकार्यं कृतम्। यद्यपि अमीभिः कुर्कुरैः स्वभावतो मुनेरुपसर्गो न विहितस्तथापि त्वया तु अभिप्रायप्रतिकूलत्वाद् मुनिर्हत एव। यत्कार्यं प्राकृतमनुष्येष्वपि कर्तुम् अयुक्तं तद् भवताऽस्मिन् भगवति कृतम् !, अतो रे जीव ! तव का गतिर्भविष्यति ?। अन्यच्च, योऽयं मुनिः कुपितः सन् स्वकीयतपस्तेजसा त्रैलोक्यमपि निर्दहेत् तस्याग्रतोऽहं वराकः कस्यां गणनायामस्मि ?, परम् अहो मयि मूर्खशिरोमणौ महापराधकारिण्यपि अस्य भगवतः कृपालोः क्षमा !, यद् मयि दुष्टे कोपलेशोऽपि अनेन न स्पृष्टः। एतादृशैरेव महापुरुषैः किल इयं लोकव्यवस्था निर्वहति। यदुक्तम्—

"यद् दहन्ति न मार्तण्डा[1] न क्षुभ्यन्ति यदब्धयः। यच्च शक्ता[2]स्तितिक्षन्ते[3] तेनेदं वर्तते जगत्" ॥ १ ॥

पुनर्निश्चितमसौ भगवान् ज्ञानेन स्वल्पपरिवारं छत्र-चामराद्याडम्बरवर्जितमपि मां नराधिपं जानाति, तथा मम दुर्विनीतस्य इमं दुर्विनयमपि वेत्ति, ततोऽद्य मम राजशब्दो निरर्थकः संजातः। अथाऽहम् अग्रतो भूत्वा स्वकीयं मुखं दर्शयितुं न शक्नोमि, नापि च मुनिं प्रसन्नम् अकृत्वा इतः स्थानाद् गन्तुं समर्थो भवामि। हा कष्टम् ! अहं शोच्य[4]चरित्रोऽस्मि, पुनरप्रति[5]कार्यपापोऽस्मि। हा ! हतोऽहम्, किं

१ सूर्याः। २ समर्थाः। ३ क्षमन्ते। ४ निन्द्यचरित्रः। ५ अपरिहार्यपापः।

करोमि ? क्क गच्छामि ? किं वदामि ? सुकृती सरलश्च कः पुमान् मे पापं शृणोति ? । अथवा किमनया चिन्तया ?, हे मुनीन्द्रशिरोमणे ! त्वं त्रिजगत्यपि पूज्योऽसि, अहं तव दासानुदासोऽस्मि । हे भगवन् ! मयि प्रसन्नो भव, मम पापप्रतीकारं कुरु । किञ्च, रे जीव ! एवंविधमुनीन्द्राणाम् अनेकशश्चरणसेवाकारिणस्तातपादान् किं न स्मरसि ? । तवापि ईदृशमुनीन्द्रचरणसेवाव्यतिरेकेण एतदुरुत्तारसंसारपारावारपारगमनं सुदुर्लभम् इति विचिन्त्य एतच्चरणमेव शरणं कुरु" । इत्थं बहुविधपश्चात्तापव्याकुलीभूतो भूपालो यावत् स्वमनसि कृत्याऽकृत्ये चिन्तयति तावद् अर्हद्दत्तो नाम पुण्यवान् श्रावकस्तं मुनीश्वरं वन्दितुं तत्र समाजगाम । अथ तं तथाऽऽगच्छन्तं दृष्ट्वा भूपोऽधिकं लज्जते स्म । ततः स श्रावकोऽपि तत्स्वरूपं दृष्ट्वा नृपाभिमुखं गत्वा लज्जया नम्रीकृतग्रीवं तं भूपं प्रणम्य 'हे देव ! किमेतद् ?' इति मधुरवाण्या पप्रच्छ । तदा भूपतिः पश्चात्तापं कुर्वन् 'पापिनो मनुष्यश्वानस्य यत्कार्यं कर्तुं युक्तं तदेतज्जातम्' इति तं प्रोवाच । तदाऽवसरज्ञोऽर्हद्दत्तः स्माह—'हे महाराज ! शान्तं पापम्, त्वम् एवं किं विषण्णो भवसि । त्वं नरेन्द्रः पञ्चमो लोकपालश्चाऽसि, तव जिह्वा लाघवयुता क्वापि न दृष्टा, ततो भवतोऽधुना ईदृग् दीनं वचनं कुतः प्रादुर्भूतम् ? । हे राजन् ! गुरोः कृतोपसर्गस्य पश्चात्तापाकुलस्य च भवतः प्राकृतनरस्येव किमर्थम् इयमात्मविगर्हणा ? । यतः कर्तव्यानां विनाशेषु शोच्यते, भवतस्तु अद्यापि किमपि विनष्टं नास्ति । अथापि भवान् साहसिको विवेकी विनयी च सन् आचार्यं प्रसन्नीकर्तुं समर्थोऽस्ति । अयं पुनः प्रभुः शान्तो दान्तः

कृपालुर्जीवपालकश्च विद्यते, अतोऽसौ प्रसाद्यमानः किं प्रसीदति नवेति त्वं मा शङ्किष्ठाः, यतोऽयं मुनीन्द्रः परमब्रह्मलीनेन मनसा तन्मयतां गतः सन् मनागपि ते पराभवं नाद्रियते । उक्तञ्च—

“दत्तेषु दानशौण्डानामभिध्यानामर्जितेषु च । योगिनां चोपसर्गेषु कियत्सु कियती स्मृतिः ?” ॥ १ ॥

तस्माद् भो भूपाल ! किमेतेन तव अनल्पविकल्पशङ्कुना ?, नलभूपस्य पूर्वभवे मुनौ प्रतिकूलक्रियैव । भवादृशाम् अमी भावाः कदाचिद् दैवयोगतो भवन्ति । अथापि हे पृथ्वीपाल ! सत्वरमेहि एहि, कालक्षेपं परित्यज, भक्तियोग्यं वेषं भज, वक्रीकृतग्रीवम् अश्वं मुञ्च । एषोऽहं तवाऽग्रेसरो भवामि, त्वं भूमौ विलुठन् भगवच्चरणसमीपमुपेत्य प्रणिपत्य च स्वजन्म सफलं कुरु, भगवच्चरणरजश्चूर्णेन स्वशरीरं द्रव्यतो धूसरं भावतश्च सुपवित्रं विधेहि । केवलं मनो-वाक्-कायशुद्ध्या भगवत्पादान् एव भजस्व, यत ईदृशमुनीन्द्राणां भक्तिः परमार्थतः स्वार्थसाधनमेवास्ति । उक्तञ्च—

“या भक्तिः सर्वसाधूनां वस्तुतः स्वार्थ एव सः । तैलक्षेपो हि दीपानां गृहस्यैव प्रकाशकः” ॥ १ ॥

पुनर्भो भूपाल ! त्वं धन्योऽसि यत् त्वयाऽप्रयासेन अयं मुनीन्द्रो दृष्टः, यस्माद् महानिधीनामिव साधूनां प्राप्तिर्यथा तथा न भवति । अपिच, भवतो भवे भवे दुःखैकहेतुर्मृगयारम्भः क ? पुनः सर्वदा परमानन्दकारणम् इदं मुनिदर्शनं क ? । त्वया किल अवकरनिकरं खनता मरकतमणिः प्राप्तः । तथा हे

राजन् ! मृन्मयमपि गुरुं गुरुबुद्ध्या आराध्य यदि एकलव्यादिभिः पामरैरपि वाञ्छितं लब्धं तर्हि भवतस्तु अमुं त्रिकालज्ञं सूरिमुख्यं सेवमानस्य आजन्मोपार्जितान्यपि पापानि सद्यो विलीयन्ताम्। असौ मुनीन्द्रः किल पूर्वं कलिङ्गदेशस्वामिनोऽमरदत्तभूपस्य पुत्रः सुदत्तो नाम राजेन्द्रः समभवत्। तत्र च अस्य शास्त्रोक्तनीत्या पृथ्वीं पालयतो दण्डनीतिरत्यन्तम् अनिष्टाऽभूत। तदाऽसौ राजधर्मस्य क्रूरत्वं विचिन्तयन्, कृतकर्मणां च भोक्तव्यतां विभावयन्, जगताम् अस्थैर्यं जानन्, विरक्तीभूय आत्मार्थमुत्थितो राज्यपराङ्मुखश्च सन् आनन्दशक्तये कुमाराय राज्यं दत्त्वा स्वयं सुधर्माचार्यसमीपे दीक्षाम् अग्रहीत्। ततोऽस्य अत्युग्रं तपस्तप्यतो बहुविधा महान्तोऽतिशयाः प्रादुर्भूताः, तत्प्रभावाद् अयं स्वामी बुभुक्षा-पिपासा-शीत-वाता-ऽऽतपादिभिः सुदुःसहैरपि उपसर्गैर्नाक्रम्यते। अस्य शरीरमलः कर्पूरतुल्यः सुगन्धिरस्ति, केशाश्च अपुनर्भवा विद्यन्ते, मयूराश्च पिच्छविस्तारैर्मस्तके छायां कुर्वन्ति, गजाः शुण्डादण्डाहृतैर्जलैरग्रतो भूखण्डं सिञ्चन्ति, वायवो वेगात् कुसुमनिकरं विकिरन्ति, सिंहाद्याः सेवका इव सेवन्ते, किन्नर्यो गीतं गायन्ति, लोकाश्च स्थाने स्थाने भक्तिं कर्तुं रुचिमन्तो भवन्ति। पुनर्यत्र अयं मुनीन्द्रो विहरति तत्र ईति-भीति-दुर्भिक्ष-डमर-विरोध-वह्नि-दुर्वायुप्रमुखोपद्रवा न प्रादुर्भवन्ति। विविधरोगपीडिताश्च नरा अस्य चरणोदकं पीत्वा सद्यो रोगविवर्जिता भवन्ति। ततश्च हे महाराज ! अस्य राजर्षेर्दर्शनं शकुनेभ्योऽप्यधिकं

---

१ मृत्तिकामयम्। २ डमरो विप्लवः।

शकुनं, मङ्गलेभ्योऽपि च अधिकं मङ्गलं विचिन्तय। पुनस्तावद् अस्य लब्धिरत्नाकरस्य मुनेरिहैव त्वं प्रभावं पश्य—यस्य तरोरधोऽयं प्रभुः स्थितोऽस्ति तस्य च्छायाऽद्यापि न परिवर्तते, तथाऽमी भगवत्पार्श्ववर्तिनो वृक्षा अकालेऽपि फलिताः सन्ति, अयं भगवदाश्रितप्रदेशश्च शून्योऽपि समन्तात् सर्वलोकानां सेव्य इव प्रतिभासते। पुनस्त्वं स्वानुभवत एव जानीहि, यतोऽत्रागतस्य तवापि हे राजन्! कोऽपि सान्द्रो रोमाञ्चकञ्चुकः संजातोऽस्ति, तथा चेतसि सुमहती लज्जा पश्चात्तापस्त्रासः सौजन्यं च प्रादुर्भूतमस्ति। अथ हे नरेन्द्र! स्वकृतमुपसर्गं त्वयि मनसाऽत्यर्थं शोचति सति अयं प्रभुः परपीडापीडितो दुःखी भवति; अतोऽमुं संकल्पं परित्यज, स्वकार्यं च साधय"।

ततः स भूपतिरित्थं विनययुक्तैरर्हद्दत्तस्य वचोभिर्लज्जमानोऽपि कथमपि भयं जित्वा तं श्राद्धमग्रेकृत्य मुनीन्द्रसमीपमागत्य लुठन् धूसराङ्गः सन् तत्पादयुगं प्रणम्य भक्तिभरेण इदम् उदारवचनमुवाच—"हे स्वामिन्! महात्मनाम् अयं सहजः स्वभावोऽस्ति, यत् पापिनो नरा अपराधं कुर्वन्ति तद् महान्तः सहन्ते, परं ते स्वयं कदापि दोषापेक्षिणो न भवन्ति। अतो भगवन्! मम सर्वमपराधं क्षमस्व, प्रसादं च कुरु। यद्वा हे प्रभो! त्वं न प्रसीदसि न वा विषीदसि, त्वयि न स्तुतिर्नापि च निन्दा विद्यते, प्राणिनाम् अविनयो विनयोऽपि च त्वां न स्पृशति, अतो हे नाथ! त्वयि यद् भव्यम् अभव्यं वा क्रियते तत् कर्तुरेव

१ लब्धिसमुद्रस्य।

भवति। पुनस्त्वम् एकत्राऽस्थिरोऽपि संयमयोगे स्थिरतरोऽसि, तथा सर्वत्र निर्ममत्वोऽपि जनेषु सदयोऽसि, पुनस्त्वं सर्वथा निर्भयोऽपि भवभीरुरसि, किं बहूक्त्या? तव सर्वेऽपि भावा अन्तरङ्गविषया विद्यन्ते। यतो यैश्वराचरमिदं सर्वं जगत् पराभूतं तेऽन्तरङ्गवैरिणः सर्वेऽपि भवता लीलया निर्जिताः। तथा यत्र त्रिजगतामपि शक्तिर्नास्ति स पन्था भवताऽतिक्रान्तः। हे स्वामिन्! निर्भयस्य निरन्तरं सर्वप्राणिनामभयदानदायिनस्तव नामतुल्यतां सुरतरु-सुरमणि-कामकुम्भादयोऽपि न प्राप्नुवन्ति, अतस्तव कोऽप्यचिन्त्यो महिमा विद्यते। अथ काञ्चनगिरिर्वैक्रियपवनस्य महान्तं प्रहारमिव त्वं मे दुर्जनस्य सकलं स्खलितं सहस्व, यतो भूमौ स्खलितानां यथा भूमिरेव गतिस्तथा त्वयि रुष्टे त्वमेव गतिरसि, अतो हे धर्मवीर! धर्मरहितं शरणं प्राप्तं माम् अधमं त्रायस्व। हे भगवन्! यद्यपि दरिद्रे नृपतावपि च ते मनोवृत्तिस्तुल्या वर्तते तथापि 'भूपाल' इति ज्ञात्वा मे बहुमानं दातुमर्हसि"। अथ इत्थं पुनः पुनर्दीनवचो भणन् भूपतिः सर्वपरिवारेण अर्हद्दत्तेन च वारितोऽपि यावद् न तस्थौ तावत् सानुकम्पः स राजर्षिः कम्पमानं हर्षाद् वाष्पजलवर्षिणं तं राजानमवोचत्—"हे राजन्! तव स्वागतम्, इतः प्रदेशतस्तावद् इहोपविश्यताम्। भवान् सद्धर्मरुच्या विजयी अस्ति। तव अनेन प्रणामकष्टेन अमीभिः पश्चात्तापमिश्रितैर्वचनविस्तारैश्च सृतम्!, यतो मम चित्ते तु रोषलेशोऽपि न सम्भवति, ततः किं मां तोषयसि?, पुत्रजन्म विनैव नामकरणोत्सवः कथं

---

१ भेदः। २ आश्रयः।

संजाघटीति ?। तथा पुनः पुनर्मां प्रणामप्रयासेन प्रसन्नीकुर्वंस्त्वं प्रायो मम सक्रोधतामिव प्रकटयसि, तस्माद् अलं तव वारं वारं प्रणामादिभिः। त्वया तु मदीयदर्शनेनैव शान्तभावं प्राप्तवता मम धर्माधिकारिभवनाद् मह्यमुपकृतम् । यद्वा तव पूज्येषु नम्रीभावो युक्त एव, यस्मात् त्वं सुरेन्द्रदत्तस्य पुत्रोऽसि । तथा हे गुणधर ! 'मां नृपं बहु मन्यस्व' इति त्वया किमुक्तम् ?, न हि त्वं नरेषु सामान्योऽसि, किन्तु विशेषतो गीतार्थोऽसि; अतोऽस्माकं माननीयोऽसि । अहं सर्वजीवेषु समभावोऽपि त्वयि विशेषतः प्रसन्नोऽस्मि । हे पुरुषश्रेष्ठ ! तव पृष्ठे हस्तोऽर्पितः, त्वमुत्तिष्ठ, मां मनोऽभिमतान् अर्थान् पृच्छ, स्वमनसः संशयान् छिन्द्धि, मा मनागपि विषीद । श्रीजिनेश्वरस्त्वां भवदुःखात् पातु" । एवं मुनीन्द्रेण सप्रसन्नम् उक्ते सति भूपतिस्तुष्टः सन् प्रत्युवाच–"हे भगवन् ! भवताऽहं पापीति विज्ञाय न अनादृतः, मानीति न तिरस्कृतः, विराधक इति न द्विष्टः, मूर्ख इत्युक्त्वा न निन्दितः, निर्लज्ज इति न निर्भर्त्सितोऽस्मि, अतः सर्वथाऽनुगृहीतोऽस्मि । तव तत्त्वदृष्टेर्महात्मनो मयि सुमहान् पक्षपातो विद्यते । तथा सुरेन्द्रदत्तो मे तातः परलोकं गतोऽपि अद्य जीवति, यस्माद् भवादृशोऽपि स्वामी एवं वदति । पुनर्भो मुनीन्द्र ! अद्य सर्वपापहारिण्यः कल्याणकारिण्यः प्रशस्यतरास्तवाशिषो मम सर्वतः सन्तापं हरन्ति । किञ्च, हे स्वामिन् ! यद् भवता मम संशयोच्छेदनाऽऽदेशो दत्तस्तद् युक्तम्, परं किञ्चिज्ज्ञानवतः पुंसः किञ्चिद् अज्ञातं संशय उच्यते, मादृशस्तु सर्वमोहमयः पुमान् कं सन्देहं दूरीकरोतु ?। अधुना पुनर्भवद्दर्शनाद् मम सद्यो बोधः समुत्पन्नो-

ऽस्ति,, ततोऽहं पृच्छामि—हे भगवन्! इदं जगत् कस्मादुत्पद्यते?, कथं तिष्ठति?, कथं च विलीयते?। पुनर्धर्मज्ञौ मम माता-पितरौ कां गतिं गतौ?। मम एतत्संशयोच्छेदं कुरु, अहम् आजन्मतः पापी आत्मनो गतिं तु न पृच्छामि"। अथ उपयोगवता राज्ञा एवं पृष्टः सन् स तत्त्वविद् धर्माचार्यः प्रोवाच— "हे राजन्! देशनां ददतो भगवतः श्रीमज्जिनेन्द्रस्य सकाशाद् यथा मया श्रुतं तथाऽहं तवाग्रे जगतां प्रवृत्तिं कथयिष्यामि। पुनर्दृष्टिवादाध्ययनतः श्रुतकेवलित्वेनाहं सर्वेषां जीवानां गतिम् आगतिं चाऽपि जानामि। तत्र तावद् जगत्प्रवृत्तिं शृणु—

आद्यन्तवर्जितः श्रीमान् व्यक्ताव्यक्तश्चिरन्तनः। एकोऽनेकः पुराणोऽस्ति पुरुषः परमेश्वरः॥ १॥
राग-द्वेषोद्भवैस्तैस्तैः कर्मभिः सोऽयमावृतः। अविद्याऽऽलिङ्गितः सूते जगन्ति त्रीणि चेतनः॥ २॥
ततः प्रकृतयस्तास्ता विचित्राः सर्वकर्मणाम्। तिष्ठन्तमनुवर्तन्ते चतुर्गतिषु सर्वथा॥ ३॥
क्वचित्काले तु संहृत्य निःशेषं कर्मसंचयम्। कृत्वा योगनिरोधं च संसाराद्धि निवर्तते॥ ४॥
ततो जन्म-जरा-मृत्युवर्जितो निर्मलोऽचलः। लोकाग्रगो निराबाधः स्वस्वरूपेऽवतिष्ठते॥ ५॥
सर्वोपाधेश्च संहारो मोक्ष इत्यभिधीयते। यतो न पुनरावृत्तिरानन्दैकपदं च यत्॥ ६॥
या काचिच्चेतना देहे सोऽहं सोऽहमिति स्मरन्। अखण्डध्यानधाराणां परमात्मा व्यवस्थितः॥ ७॥

---

१ उत्पादयतीत्यर्थः। २ विनाशः। ३ आगमनम्।

तथाऽयम् आत्मा यम-नियमा-ऽऽसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरूपाऽष्टाङ्गयोगाऽत्यन्ताभ्यासतः परमात्मा संपद्यते । अयं सर्वतत्त्वज्ञानसारविचारो मया तवाग्रे प्रकटितः । शेषाः सर्वेऽपि शास्त्रार्थविस्तराः सन्ति । अथ पुनर्यत् त्वया माता-पित्रोर्गतिः पृष्टा तदपि शृणु—दीक्षाग्रहणोन्मुखस्तव पिता नयनावलीदत्तविषेण अकस्माद् मृत्युं प्राप्तः । ततस्तन्माता चन्द्रमत्यपि मोहात् तदनु मृता । भवान्तरे च आर्तध्यानवशात् तौ द्वौ मयूर-श्वानौ अभूताम् । तत्र च कुमरणेन मृत्वा सुवेलपर्वतवने नकुल-सर्पौ जातौ । तत्रापि परस्परप्रहारादिना मृत्वा सिप्रायां नद्यां रोहितमत्स्य-सहस्रदंष्ट्रग्राहौ अभूताम् । तत्र ग्राहश्च दासीरक्षणाय धीवरैः कदर्थनया हतः । स्वपितृजीवो महामत्स्यस्तु त्वया पितुः श्रेयसे कल्पितः । ततो माताऽजा जाता, नृपस्तु तत्पुत्रोऽजो जातः । तत्र च तां स्वमातरं रममाणः सोऽजो यूथाधीशेन हतो वेदनाविह्वलो मृत्वा तस्या अजायाः कुक्षौ स्ववीर्ये एव उत्पन्नः । ततो मृगयानिवृत्तस्त्वं गर्भिणीं तामजां हत्वा तत्कुक्षितोऽयोनिसंभवं नाम अजं गृहीत्वा स्वस्थानमागतः । ततो मातृजीवो महिषो जज्ञे येन तवाऽश्वो विनाशितः । तदनन्तरं काले त्वं तं महिषं मेषं च भुक्तवानसि । ततः पुनः कुर्कुटतां प्राप्तौ । तत्रापि कालदण्डकरस्थितौ तौ वनमध्ये त्वया शब्दवेधिना हतौ । इत्थम् एतेषु भवेषु बहुविधविडम्बनामनुभूय साम्प्रतं तौ द्वावपि पितृ-पितामही[1]जीवौ लघुकर्माणौ भूत्वा तवैव पुत्र-पुत्रीभावं प्राप्तौ स्तः" ।

१ पितामही जनकमाता ।

अथैतद् गुरुवचनं श्रुत्वा स भूपतिः कम्पमानः स्वेदपूरपूरितदेहश्च सन् परशुच्छिन्न उन्नतस्तरुरिव झटिति महीतले पतति स्म। तथा स्वानुभवसिद्धमिदं गुरुवचनं व्याकुलेन मनसा चिन्तयतस्तस्य हृदये शोकशङ्कुर्न माति स्म। तदा विसंस्थुलमौलिबन्धनं लुलितभ्रान्तचपलविलोचनं मूर्च्छागतम् अचेतनमिव तं दृष्ट्वा पार्श्ववर्तिभिः सेवकैर्वक्षःस्थलताडनोत्तरं पृतिक्रियते स्म। तथाहि—

उदकमुदकं वायुर्वायुर्व्रतासनमासनं, भजत भजत च्छत्रं छत्रं हहाऽऽतप आतपः।
इति सरभसं भीतभ्राम्यज्जनाननसम्भव—स्तदनु तुमुलो लोलः कोलाहलः सुमहानभूत्॥ १॥

पुनस्तदा अर्हद्दत्त-कालदण्डावपि 'किमिदम्' इति भ्रान्तचित्तौ बभूवतुः। मुनीन्द्रस्यापि च नेत्रे नवजलबिन्दुस्यन्दिनी अभूताम्। ततः शीतैर्जलैर्जलार्द्रवस्त्राहतपवनैश्च शीतलोपचारैः स्वस्थीकृतः स मालवभूपालः पुनश्चैतन्यं प्रत्यागतवान्। परं स्वकृताऽकृत्यस्मरणेन हृदि दुस्सहं दुःखमुद्वहन् शरीरं खण्डशश्छित्त्वा अग्निसात्[1] कर्तुमैच्छत्। पुनस्तदा स भूपो न मुनिं पश्यति स्म, नाऽर्हद्दत्तं, नापि चाऽन्यान् लोकान् पश्यति स्म; किन्तु केवलं रोषरुक्षदृष्ट्या पृथ्वीमेवाऽपश्यत्। तथा स्वकृतपापं दुष्परिहारं विचिन्त्य मरणोन्मुखः सन् पातकस्य प्रतीकारमपि मुनिं न पप्रच्छ। ततो ज्ञानी सुदत्ताचार्यस्तमुवाच—'हहा वत्स!

---

१ अग्नेरधीनम्।

आत्मद्रोहिणस्तवेदं साहसं धिगस्तु । इतः प्रदेशात् तव एकं पदमपि क्षेप्तुं[1] न युक्तम्, यतो हे राजेन्द्र ! येन मार्गेण गन्तुमिच्छसि स एष नारकः पन्था विद्यते । यदुक्तम्—

शोक-लोभ-भय-क्रोधैरन्यैर्वा कारणान्तरैः । कुर्वतः स्ववधं जन्तोः परलोको न शुध्यति" ॥ १ ॥

तथा श्रीजिनेन्द्रैः स्वात्मनि परात्मनि वा हिंसापापं तुल्यमेवोक्तमस्ति, न तु विभिन्नम्, तस्माद् आत्मघातेच्छां परित्यज्य सकलक्लेशनाशिनीं पारमेश्वरीं दीक्षां गृहाण, यया त्वं सकलानन्ददायिनीं सिद्धिं प्राप्स्यसे । यत् पुनस्त्वम् आत्मनि इच्छसि तत् तव वैरिणामपि मा भूत् । न ह्यहं तव हत्यां कारयितुमागतोऽस्मि, किन्तु पापमोक्षाय त्वां दीक्षया संयोजयिष्यामि । मयि निकटवर्तिनि तवाऽसुरो मृत्युर्मा भूत्" । एतद् गुरुवचः श्रुत्वा स भूपतिः स्वस्मिन् अयोग्यबुद्ध्या 'मादृशस्य प्रव्रज्यया कथं शुद्धिः स्याद् ?' इति पुनः पप्रच्छ । तदा मुनीन्द्रेणोक्तम्—'भो राजन् ! त्वं निःशङ्कं सकामनिर्जराप्रायेण शुद्धसाधुधर्माचरणेन आत्मस्थशोकशङ्कुमुद्धारय' । ततस्तया प्रत्याशया तुष्टचित्तो नरेन्द्रः प्रव्रज्याग्रहणोत्सुकः सन् पार्श्वस्थान् सेवकान् आवाम्[2] आकारयितुम्[3] आदिशत् । तदा तद्वृत्तान्तमाकर्ण्य स्वामिदुःखेन दुःखितं सबाल-वृद्धं सर्वमपि नगरम् आवाभ्यां सह तत्रोपागमत् । अन्तःपुरस्त्रियः श्रेष्ठिनः सार्थवाहाः सामन्ता मन्त्रिणश्चापि वाहनैर्विनैव सर्वतो धावन्ति स्म । तदा तद्वनं सर्वलोकैर्व्याप्तमभूत्, नगरं च शून्यतामगमत् । अथ भो मारिदत्त !

१ अग्रे मोक्तुम् । २ पुत्र-पुत्र्यौ—अभयरुच्यभयमत्यौ । ३ आह्वातुम् ।

मुनिपादान्ते लुठन्तं तं स्वपितरं गुणधरभूपतिं दृष्ट्वा 'अयं नृपः स्याद् अथवाऽन्यः कश्चिद् ?' इति संशयं प्राप्ताभ्यां 'किमेतद् ?' इति भीताभ्याम् आवाभ्यां नागरलोकैः सह समीपमागत्य सत्वरं नृपः पृष्टः—"अहो महाराज ! भवच्छरीरे आधिर्वा व्याधिर्वा मनागपि न दृश्यते, तथापि त्वं उत्खातदंष्ट्रः[1] सर्प इव भग्नदन्तो[2] हस्ती इव उत्साहं परित्यज्य कथं दीनां दशामवगाहसे ? । तथा राहुरुद्धचन्द्रबिम्बमिव तव मुखं कथं विच्छायं[3] लक्ष्यते ?। पुनः शोकसन्तापसूचकास्तवाऽमी बाष्पधाराणां प्रवाहाः कथं प्रवृत्ताः सन्ति ?। हा देव ! अस्माकं शीघ्रं तत्त्वं ब्रूहि, वयं सर्वेऽप्यमी त्वज्जीवजीविनः किमेतदिति विह्वलाः सन्तः पीड्यामहे"। तदा नृपः प्रोवाच—"अहो पुत्रौ ! अहो मन्त्रिप्रमुखाः पौराः ! किं यूयं पृच्छथ ?। मयि दुरात्मनि युष्माकं किमर्थमयं पक्षपातः ?। अस्मत्कुले हि असौ असौ व्यतिकरो व्यतीतः, स्वमातृ-जनकमांसभक्षकः सोऽहं गुणधरोऽस्मि !। अथवा यादृशी माता तादृश एव पुत्रो भवेत्, न हि पटोलिं[4]काक्षारवल्ली कदापि मधुरं कदलीफलमुत्पादयति । या पापिनी स्वप्राणाधारं पतिं हन्ति तत्पुत्रः पितृघातकः किं न स्यात् ?। यन्मया महावैरीव पुनः पुनः पिता हतो भो लोकाः ! सोऽहं पितृघातकः पापश्चण्डालः पृथिव्या न कवलितः, कालसर्पेण वा न दष्टः, वज्रेण वा मस्तके न प्रहतः, स्वयं वा शतधा न खण्डितः, वज्रमयो दुर्मरो विषकीटक इव घोरैः पापशतैरपि न विदीर्ये, दिव्यैरपि मयि शुद्धिः कर्तुं न शक्यते, एवंविधं मां पापिनं साम्प्र-

१ उत्खाता दंष्ट्रा यस्य सः । २ भग्ना दन्ता यस्य सः । ३ कान्तिरहितम्—म्लानम् । ४ ज्योत्स्नी—जाली, भाषायाम्—'पटोल' ।

तं 'चिरं जीव' इति किं ब्रूत ?। अहो वृद्धा ! यूयं तिष्ठत, यतोऽयं क्रमो मयि न योग्यः । पुनर्भोः कामिन्यः ! इतो दूरीभवन्तु, किं मोहयितुमागताः ?। नरकगामिनो मे भवतीभिः परिरक्षणं न भवति। साम्प्रतं यो मां मृत्योः परित्याज्य शरणं प्रददाति स मया सुदत्ताचार्यः स्वामी संप्राप्तः, अतः परम् अस्माकं भोगतृष्णया सृतम्। युष्मभ्यं स्वस्त्यस्तु, राज्याय च स्वस्त्यस्तु, इतो यूयम् इतो वयं, अस्माभि र्मदमोहितैर्युष्मासु यद् अपराद्धं तत् क्षन्तव्यम् । भोः पौरा ! एष वः प्रणामाञ्जलिरस्ति । पुनर्भो लोका ! मां दरिद्रं मा जानीत, अहं सर्वेभ्योऽपि सुस्थितोऽस्मि यद् अद्यापि कृपापरोऽयं भगवान् मां स्वीकरोति" । इत्थं तस्मिन् भूपे करुणं वचो वदति सति आवाम् अन्तःकरणे चिन्ताभरव्याप्तौ भ्रान्तौ च संजातौ । तदा 'कथमहं सुरेन्द्रदत्तोऽस्मि ?, कथमहं चन्द्रमत्यस्मि ?' इति द्वयोरावयोश्चित्तं ध्यानधारया समाक्रान्तम् । ततो निद्रामिव मूर्च्छां संप्राप्य स्वेच्छया स्वप्नमिव आदर्शे प्रतिबिम्बमिव वा स्वकीयप्राग्भवस्वरूपं सर्वमपि दृष्टवन्तौ। अथ साक्षात् तत्स्मरणेन त्रयोऽपि वयं परस्परं द्रष्टुमपि अशक्नुवन्तः सुगुरोः पादयुगम् आलिङ्ग्य हृदयमध्ये सर्वं जगद् इन्द्रजालं शोचामहे । तदा प्रचुरतरशोकभृतामस्माकं त्रयाणां वैवर्ण्य-कम्प-करधूनन-गात्रभङ्गाऽश्रुपात-दीनवचन-विलापादिविकारं विलोक्य प्रादुर्भूतबहुदुःखाः सर्वे लोका अपि मोहं प्रापुः । तथा पक्षिणामपि चञ्चुपुटं मुद्रितमासीत्, हरिणादिभिश्च तृणं न गृह्यते स्म, वानरादिभिरपि वृक्षशाखान्दोलनं न क्रियते स्म । ततो गुर्वाज्ञया विनयवति विजयधर्मनाम्नि भागिनेये राज्यभारं संस्थाप्य, चैत्यपरिपाटि-

महोत्सवादि कृत्वा, दीनादिभ्यः सुपात्रेभ्यश्च यथोचितं बहुदानं दत्त्वा, सर्वपापोपशान्त्यै पञ्चसहस्रनृपादिभिरन्येन च स्वजनेन सह त्रयोऽपि वयं सर्वविरतिचारित्रम् अङ्गीकृतवन्तः। ततोऽस्माभिर्धर्मोपदेशार्थिभिरन्यैरपि च जनैर्नयनावलीप्रतिबोधार्थं प्रार्थ्यमानः स भगवान् मुनीन्द्र उवाच—'इयं दुःशीला तृतीयनरके बद्धायुष्कत्वाद् ऊषरभूमिरिव धर्मबीजस्य पात्रं नास्ति, इत्यतः सर्वथा त्याज्यैव'। तदनु सर्वेऽपि वयं तं देशं परित्यज्य भगवतः सुदत्ताचार्यस्य चरणसेवां कुर्वाणा वैयावृत्त्यपराः परीषहान् सहमानाः सिद्धान्ताऽध्ययने कृतादराः श्रीमदाचार्याऽतिशयाद् निवृत्तोपसर्गाः सन्तः सुखेन भूतले विहृतवन्तः। अहो मारिदत्त राजपुरेश्वर! स सुधर्मस्वामिशिष्यः सुदत्ताचार्यः पादाभ्यां पृथ्वीतलं पवित्रीकुर्वन् गुणधरराजर्षिणा सह तत्पुत्राभ्यामावाभ्याम् अन्यैश्च बहुभिः शिष्यैः सह साम्प्रतम् इह समागतोऽस्ति। यो हि मुनीन्द्रः सौभाग्येन उपशमेन च जितकन्दर्पो विद्यते, धर्मार्थिनः सर्वेऽपि यं द्रष्टुमिच्छन्ति, रागद्वेषौ च येन प्रलयं प्रापितौ, देवेन्द्रा अपि यस्मै भक्त्या नमस्कुर्वन्ति, अभव्या दूरभव्याश्च प्रायो यस्माद् दूरे तिष्ठन्ति, यस्य मनश्च शत्रौ मित्रे च संसारे मोक्षे च तृणे मणौ च निरन्तरं तुल्यं वर्तते, पुनर्यस्मिन् सर्वेऽपि उत्तमगुणा एकीभूय स्थिताः सन्ति, स त्रिजगद्विख्यातो दुर्लभदर्शन एतन्नगरोद्यानसमीपे कृतनिवासः सुदत्तगुरुरद्य आवाम् अष्टमतपःपारणार्थं नगरान्तर्गमनाय समादिशति स्म। तत आवां माधुकरीवृत्त्यर्थम् इमां पुरीं

१ पुत्रश्च पुत्री च पुत्रौ, ताभ्याम्। २ गोचरीचर्यार्थम्।

प्रविशन्तौ एभिः सेवकैर्बलाद् निगृह्य तव समीपमानीतौ । हे राजन्! यत्त्वया धर्मस्वरूपं भवपारम्पर्यं च पृष्टं तद् मया सर्वमपि अष्टभवपर्यन्तं तवाग्रे कथितम्, संसारस्वरूपं सर्वमपि ईदृशं जानीहि" ।

अथैवं तस्मिन् अभयरुचिमुनीन्द्रे मालवनरेन्द्रकुलप्रशस्तिम् उक्तवति सति स मारिदत्तः स्वकृताऽकार्यस्मरणेन अकस्माद् मूर्च्छां प्राप्य स्वर्णमयपीठाद् भूमौ पपात । तदा सर्वाऽपि सभा चिन्तामग्नत्वेन चित्रलिखितेव निश्चला बभूव । ततो 'हे राजन्! मा व्याकुलो भव, मा व्याकुलो भव' इति पुनः पुनस्तस्य मुनेर्वचः शृण्वन् सम्बन्धविह्वलः स भूपतिर्निःश्वासान् मुञ्चन् श्रमवारि वर्षन् अपूर्वकलङ्कतसत्वेन दुःखाकुलश्च सन् 'हा हा!' इति कथनपूर्वकं साऽङ्गभङ्गमुत्थाय धीरोऽपि भीरुरिव भीतदशां प्राप्तः सन् नयनाभ्याम् अश्रूणि विमुञ्चन् इत्युवाच–'अहह! ममेदं महत्कष्टं संप्राप्तम् । यदि वा दैवस्य दुस्सहतरो विचारोऽस्ति, अन्यथा येषां मनोरथशतैरत्रागमनं चिन्तितं तेषाम् अनेन विधिना समागमः कथमभूत्? । मया पुनः साम्प्रतम् अनयोरविनयं कुर्वता कीदृग् अकार्यं कृतम्? । अधमैः कौलैर्मलिनीकृतबुद्धिं माम् अधन्यं धिगस्तु । अथाऽहम् एतत्सभामध्ये पुनः स्वमस्तकम् ऊर्ध्वीकर्तुं कथं समर्थो भविष्यामि? । योऽसौ गुणधरो यतिः स मे भगिनीपतिः, यतः सा जयावली देवी ममैव भगिन्यस्ति । तथाऽयं श्रीमान् अभयरुचिर्मम भागिनेय[1]ः, इयमभयमती च मम भागिनेयी वर्तते । भो अभयरुचे! एहि एहि, माम् आलिङ्गस्व,

[1] भगिनीपुत्रः ।

यद्वा तिष्ठतु आलिङ्गनम्, अहं तव महर्षेश्चरणौ शिरसि धारयामि, त्वं चैनं मां सम्बन्धिनं संसाराब्धौ पतन्तमवलम्बय। तथा हे अभयमति पुण्यवति बालतपस्विनि! त्वामहं दूरात् प्रणमामि। अथ हे भगवन् करुणासमुद्र! मयि मातुलेऽपि प्रसादं कृत्वा तावत् प्रसीद, यावदहं स्वकीयं सकलपापकलङ्कपङ्कं प्रक्षाल्य भवदङ्गसमीपयोग्यो भवामि। इदानीं भो भोः सेवकाः! पापिनः कौलाः क्व?, सत्वरं कौलशिरोभिः पृथ्वीं समास्तृणुत। यद्वाऽभयरुचौ स्थिते सति न हि एतद् युक्तं, परं सकलोऽपि कौलो देशाद् निष्काश्यताम्। तथा योगिन्यादिदुराचारिस्त्रीणां चारकशोधनाज्ञा[1] भवतु, अमीषण्डाश्च नापितकार्यं भजन्तु। तथा मदिराया भाण्डानि लकुटैः खण्डयत। मम देशे पुनर्जीवघातो मा भूत्। अमी मृगाः पुनर्वनभूमिषु स्वेच्छया चरन्तु, पक्षिणश्च निजेच्छयाऽऽकाशे संचरन्तु। जलचरजीवास्तु ये ये यतः स्थानाद् आनीता अभूवन् तांस्तान् तेषु तेषु जलस्थानेषु निराबाधं प्रवेशयत'।

ततो नृपाज्ञया मन्त्रिप्रमुखैः सर्वेऽपि श्वापदा बन्धनेभ्यो मुच्यन्ते स्म, पक्षिणश्च पञ्जरेभ्यो निष्काश्यन्ते स्म, मत्स्यादयो जलचरास्तु बहुजलपूरणादियत्नेन जलेषु प्रक्षिप्यन्ते स्म। तदा ते सर्वेऽपि जीवा बन्धनोन्मुक्ता निर्भयाश्च सन्तः स्वस्वस्थानं गन्तुं समुत्सुकीभूय प्रतिदिशं व्रजन्ति स्म। पक्षिणश्च मधुरध्वनिना कूजन्तो गगने पक्षान् विस्तार्य स्वेच्छया खेलन्तो ययुः। पुनस्तदा पृथ्वी सुखेन उच्छ्वासं प्राप्तवती, दिशः

१ कारागारशोधनादेशः।

सप्रकाशा विरेजुः, जीवलोको निर्भयः सन् सुतरा हर्षोत्फुल्लः समजनि, वाताः सुशीताः सुरभयो मन्दं मन्दं वान्ति स्म; केवलं कोऽपि प्राणरक्षणमयः कोलाहलोऽभूत्।

अत्रान्तरेऽकस्मात् पृथिव्याम् आकाशतो विविधकल्पवृक्षपुष्पवृष्टिर्बभूव। ततो 'जय जय' शब्दमुच्चरन्त्यो देवर्द्धिं दर्शयन्त्यः सिद्धदेवाङ्गना आकाशे विविधविमानैः सह प्रादुर्बभूवुः। ततस्तासां निरुपमरूप-वेष-सौभाग्यभृतां कुवलयदृशां[1] व्यन्तरीदेवतानां मध्येऽत्यद्भुतरूप-वेषधरा विविधभूषणभूषिताङ्गी चण्डमारिर्नाम देवी प्रत्यक्षाऽभूत्। ततस्तयाऽभयरुचिदर्शनेन लज्जमानया प्रथमं नृपः प्रोच्यते स्म—"अहो मारिदत्त! इयत्कालं त्वया किमिदम् अकार्यं कृतं?, यद् मोक्षसुखादिवाञ्छया निशाचरदेवदासीनाम् आराधनार्थं स्थलचरादिबहुजीवानां हिंसा विहिता। न हि मया प्रत्यक्षीभूय त्वं जीववधार्थमादिष्टः। मोक्षं दातुं पुनर्वयं क्व समर्थाः?। अस्मत्सकाशात्तु सुशीला गृहिणां स्त्रियो वरम्। इदं पुनर्धूर्तैर्वञ्चितं कुदेश्यं[2] धिगस्तु। अद्य किलाऽहं कर्णविवरामृतधारातुल्या अतिरमणीया अभयरुचेर्वाचः श्रुत्वा सम्यग् मोक्षमार्गं विज्ञाय कमपि परमानन्दं प्राप्ताऽस्मि। क्व अस्मादृशां मदनविकारोत्पादकः प्रबोधः?, क्व पुनरयं मदनादिसर्वविकारनिवारकोऽस्य मुनेः प्रबोधः?। विष-पीयूष[3]योरिव एतयोर्महदन्तरं विद्यते। अथाहं हे भगवन् योगीश्वर अभयरुचे! दूरात् प्रणमामि। तुभ्यं नमोऽस्तु, यस्मात् तव प्रसादतः पशुवधार्थं मिलितः सर्वोऽप्ययं



१ कुवलयानीव दृशो यासां—कमलनेत्राणाम्। २ दुष्टोपदेश्यम्। ३ पीयूषम् अमृतम्।

लोकः प्रबोधं प्राप्तः, दुर्बुद्धिरुद्धहृदयाऽहमपि प्रबुद्धा" । ततः पुनः सा देवी नृपं प्रोवाच—"हे मारिदत्त ! यद् अयं लोको धर्मतत्परोऽभूत्, कौलादयः कुमतयो भवता देशाद् निर्वासिताः, भगवान् सुदत्तसूरिश्च तव भूमिं प्राप्तोऽस्ति तेनाहं तुभ्यं वरं प्रयच्छामि—त्वं सर्वेषां श्रीमतां शिरोमणिर्भूत्वा रिपुविजयं प्राप्नुहि, प्रजानां प्रीतिहेतुर्भव, पुनस्त्वयि राज्यं कुर्वाणे तव देशमध्येऽभ्याद्युपद्रवा मा भवन्तु, तथाऽभयरुचिप्रवर्तितजीवरक्षाप्रभावाद् लोकपालाः सर्वेऽपि प्रसन्ना आनन्दकारका भूयासुः, यथावसरं मेघा वर्षन्तु, पापं पुनर्विलयं यातु" । इत्युक्त्वा तस्यां देवतायां सहर्षं स्वस्थानं गतायां सत्याम् आश्चर्यपूर्णं कुशास्त्रपराङ्मुखम् अविलम्बेन श्रावकधर्ममङ्गीकर्तुमिच्छन्तं तं मारिदत्तभूपालं सोऽभयरुचिमुनिः स्वयं श्रीसुदत्ताचार्यसमीपमानिन्ये । ततः स भूपतिस्तत्र युगप्रधानगुरुं नत्वा तुष्टः सन् तस्य गुरोर्वचसा सुश्रावकधर्ममङ्गीचकार । तदा गुणधरो राजर्षिस्तस्मै शिक्षां ददौ । जयावली देवी च स्नेहवशात् तं बृहद्भ्रातरमनुजगाम । ततो मारिदत्तनृपाग्रहात् श्रीसुदत्ताचार्याः कतिचिद्दिनानि तत्र स्थित्वा पारणकोत्सवैर्गृहिणां गृहाणि पवित्रीकृत्य सदुपदेशतो बहुभव्यान् प्रतिबोध्य क्वाप्यन्यत्र विहारं चक्रुः ।

अथ बहुकालात् प्रबुद्धस्य ज्ञानलहरीभिः शुद्धीभूतस्य मारिदत्तभूपस्य मनो निरन्तरं जीवाऽजीवादिनवतत्त्वासक्तं बभूव । तथा तस्य साधुभिः सह अतीव मैत्री ववृधे । आत्मनो यद् वल्लभं तत्सर्वं गुरुभ्यो दातुमैच्छत् । यत्पुनस्तेषामेषणीयम् अशनादि तदेव तस्मै रुरुचे । तथा स भूपो राजपिण्डाऽग्राहिणां साधूनां

प्रतिलाभाय साधर्मिकीमिव राज्ञीं प्रेरयामास, स्वयं च रत्नकम्बलप्रायैर्वस्तुभिर्मुनीश्वरान् अपूपुजत् । आतुराणां च साधूनां सम्यग्वैयावृत्त्यमकारयत् । श्रीजिनेन्द्रभक्तियुक्तानां गायनादीनां तु कल्पवृक्ष इव इष्टदायको बभूव । पुनर्जिनमतप्रत्यनीकान्[1] वादिनः स्वबुद्धिबलेनैव विविधयुक्तिभिर्निर्जित्य सभायां गुरूपदेशमाहात्म्यं विस्तारयामास। तथा महीमण्डलं प्रोत्तुङ्गमेरुशृङ्गोपमोन्नततरजिनमन्दिरैः श्रीखण्ड-डिण्डीर-पुण्डरीकादिवद्[2] उज्ज्वलतरयशोभिश्च सर्वतो मण्डितं[3] चकार । इत्थं धर्मकार्यं कुर्वाणः श्रीमदर्हन्तं हृदये दधानो दानयोग्येभ्योऽभीष्टदानं ददानः स मारिदत्तभूपालः सुखेन राज्यं पालयामास ।

अथ स श्रीमान् गुणधरराजर्षिः स चाऽभयरुचिः साधुः सा च अभयमती साध्वी एते सर्वेऽपि मार्दवा-ऽऽर्जवयुक्ताः सत्य-सन्तोषशोभिताः कषायाश्रववर्जितास्त्रिगुप्तिगुप्ताः पञ्चेन्द्रियजेतारः सर्वत्र निःस्पृहाश्च सन्तोऽत्युग्रं तपः कुर्वन्ति स्म । तथा मनो-वाक्-कायैकाग्रताकरणेन शरीरस्थप्राणा-ऽपानादिवायुनिरोधेन च प्राणायामं साधयन्ति स्म, यद्वशात् सेवकः स्वामित्वमिव ध्याता पुमान् ध्येयतां प्राप्नोति । तथा ते त्रयोऽपि ग्रामा-ऽऽकर-पुर-द्रोण-मडम्ब-कर्बटादिषु विचरन्तो, मनःशुद्ध्या महीतलं पवित्रीकुर्वन्तः, सद्देशनायानपात्रैरनेकभव्यजन्तून् अपारसंसारसमुद्रं तारयन्तो गृहेऽरण्ये सुखे दुःखे मित्रे शत्रौ काञ्चने प्रस्तरे च समतां[4] भजमानाः सुखेन संयमं पालयन्ति स्म । पुनस्ते क्षमाधनाः कृपासमुद्राश्चतुर्थादितपःप्रान्ते नवै-

१ प्रत्यनीकः प्रतिपक्षी—शत्रुः । २ चन्दन-फेन-श्वेतकमलादिवत् । ३ शोभितम् । ४ साम्यम्—तुल्यताम् ।

नैर्वैरभिग्रहैर्जगतां पुण्यकारणं पारणं कुर्वन्ति स्म । ततस्ते वैराग्यमहाधना मुनीन्द्राः कियता कालेन स्वकीयायुःपर्यन्तं ज्ञात्वा चतुर्विधाहारं प्रत्याख्याय पादपोपगमनं निधाय मनसि इत्थं ध्यायन्ति स्म—“श्रीमन्त ऋषभाद्याः सर्वे जिनेन्द्राः, पुण्डरीकादयो गणधराः, केवलज्ञानिभिः प्रोक्तो धर्मश्च अस्माकं भवे भवे शरणमस्तु । श्रीजिनोक्तान् षड्विधजीवान् वयं क्षमयामः, तेऽपि क्षाम्यन्तु । अस्माकं मनो-वाक्-कायजन्यं पापं मिथ्याऽस्तु । अत्र संसारेऽस्माकं कोऽपि नास्ति, वयमपि कस्यापि न स्मः । श्रीजिनचरणशरणस्थानाम् अस्माकं कदापि दैन्यं नास्ति । यानि पुनरष्टादशपापस्थानानि कृतानि तानि भवे भवे संचितानि सर्वाण्यपि त्यजामः । तथा यद् बहुभिर्यत्नैः पालितं अनेकाहारपोषितं दोषाणामेव गृहं तच्छरीरमपि व्युत्सृजामः” । इत्थं ते सर्वेऽपि गृहीताऽनशना, एकं मासमुपोषिता, महाध्यानेन परमेष्ठिनमस्कारं ध्यायन्त, उत्तरोत्तरं गुणस्थानारोहणं कुर्वन्तः, शुक्लध्यानाग्निना घातिकर्माणि भस्मसात् कृत्वा, सकललोकाऽलोकप्रकाशकं केवलज्ञानं प्राप्य, अघातिकर्माणि क्षपयित्वा, शाश्वतानन्दपूर्णं जन्म-जरा-मरणविमुक्तम् अव्याबाधं मोक्षं जग्मुः ।

॥ इति श्रीयशोधरचरित्रे नृप-जनन्योरष्टमो भवः ॥

श्रीमाणिक्यसूरिनिर्मितपद्यबन्धयशोधरचरित्रानुसारेण सर्वोऽप्ययं प्रबन्धोऽस्माभिरप्यत्रोल्लेखे प्रदर्शितः ।

परं पूज्यश्रीहरिभद्रसूरिकृतसमरादित्यचरित्रान्तर्गतप्राकृतमययशोधरचरित्रे तु अष्टमभवे एतयोर्मुक्तिगमनं नाऽभ्यधायि, किन्तु अन्यदपि भवद्वयं प्रोक्तमस्ति । तत्प्रबन्धोऽपि तदनुसारेणात्र दर्श्यते—

## ॥ अथ नवम-दशमभवौ ॥

ततोऽभयरुचिसाधुरभयमतीयुक्तः शुद्धसाधुत्वं प्रपाल्य प्रान्ते सिद्धान्तविधिना कालं कृत्वा सहस्रारनाम्नि देवलोके देवत्वेनोत्पन्नः । तत्र देवायुरुपभुज्य देवलोकाच्च्युत्वा कोशलदेशेऽयोध्यायां नगर्यां विनयधरस्य राज्ञो लक्ष्मीमत्या महाराज्याः कुक्षौ पुत्रत्वेनोत्पन्नोऽभयरुचिजीवः। कालक्रमेण जन्म संप्राप्तः। पितृभ्यां 'यशोधर' इति नाम विहितम्। अभयमतीजीवदेवोऽपि ततो देवलोकाच्च्युत्वा पाटलिपुत्रे नगरे ईशानसेनस्य राज्ञो विजयादेव्याः कुक्षौ पुत्रीत्वेनोत्पन्नः । कालक्रमेण जाता, तस्या विनयमतीति नाम च प्रतिष्ठापितम् । ततो द्वावपि तौ देहोपचयेन कलाकलापेन च वृद्धिं प्राप्तौ । तदा ईशानसेनेन सा विनयमती स्वपुत्री यशोधरस्य स्वयंवरा प्रेषिता। श्रुत्वा चेदं यशोधरो हृदयेन परितुष्टः, प्राप्ता च सा महता परिकरेण । राज्ञा बहुमानपूर्वकम् आवासिता नगराद् बहिः, कृतं च वर्धापनकं, निर्धारितो विवाह-

दिवसः। समागते तस्मिन् कुमारो महाविभूत्या विनयमतीं परिणेतुं प्रवृत्तो वाद्यमानेषु मङ्गलतूर्येषु, नृत्यत्सु पणाङ्गनागणेषु, पठत्सु मङ्गलपाठकेषु, गायन्तीषु जनन्यादिसधवस्त्रीषु, धवलगजवरारूढो राजवृन्दैः समेतः प्रासादश्रेणीतलगताभिः पुरसुन्दरीभिर्विलोक्यमानो राजमार्गं प्राप्तः। अस्मिन्नवसरे कुमारस्य दक्षिणलोचनेन स्फुरितम्, समुत्पन्नो हर्षविशेषः। चिन्तितं तेन—'शीघ्रम् अतोऽपि महाप्रमोदेन भवितव्यम्' इति। अत्रान्तरे कल्याणश्रेष्ठिभवनाऽङ्गणे गोचरचर्यया प्रविष्टः साधुर्दृष्टः। तं च दृष्ट्वा तस्य संभ्रमः समुत्पन्नः। ततः साधुधर्मस्य पूर्वाऽभ्यस्ततया, कर्मपरिणतेर्विचित्रतया, भगवतो मुनेरमोघदर्शनतया च समुत्पन्नं जातिस्मरणम्। गजेन्द्रस्कन्धे निपतन् धृतः पार्श्ववर्तिना रामभद्राभिधानेन सकलहस्त्यारोहप्रधानहस्तिपकेन[1]। 'हा! किमेतद्?' इति विद्राणो रामभद्रः, 'मा वादयत' इति वारितानि तूर्याणि। अविषादी अपि दृढं विषण्णचित्तः समागतस्तातः। 'पूगफलादिमदमूर्च्छितो भविष्यति' इति विचिन्त्य तेन चन्दनपानीयेन सेचितः। ततो लब्धा कुमारेण चेतना, उन्मीलितं लोचनयुगलम्, कृत आसनपरिग्रहः, विरक्तं संसारसागराच्चित्तम्। भणितं च तातेन—'पुत्र! किमेतद्?' इति। तेन भणितम्—'तात! दारुणं संसारविलसितम्'। तातेनोक्तम्—'पुत्र! कोऽत्र संचारचिन्ताया अवसरः?'। तेनोक्तम्—'तात! महती खलु एषा कथा संक्षेपतः कथयितुं न शक्यते, तस्माद् एकस्मिन् प्रदेशे तात उपविशतु, शब्दापयतु मे

१ हस्तिपको निषादी—हस्त्यारोहः।

मातृलोकं प्रधाननागरिकादिकं च, येन कथयामि तातस्य संसारचिन्तावसरकारणम्' इति'। ततो राजमार्गासन्नसभायामुपविष्टो राजा, शब्दापितो मातृलोकः प्रधाननागरिकादिलोकश्च स्थित उचितस्थानेषु। भणितं च तातेन–'पुत्र ! किमेतद् ?' इति। कुमारेणोक्तम्–'तात ! निर्गुण एष संसारः, मोहाभिभूताः खलु प्राणिनो न जानन्ति एतस्य स्वरूपम्, न च आलोचयन्ति, प्रवर्तन्तेऽहितकर्मणि, न प्रेक्षन्ते उत्तरकालम्। अत्र खलु सुराऽसुरसाधारणास्तावद् एते जन्म-जरा-मरण-रोग-शोक-प्रियवियोगादिविकाराः। दारुणो विपाकः स्तोकस्यापि प्रमादचेष्टितस्य, येन पिष्टमयकुर्कुटवधोऽपि प्रेक्षध्वं कथं परिणत' इति। ततो भणितः सुरेन्द्रदत्तनृपभवादिको जातिस्मरणपर्यन्तो निजवृत्तान्तः। तं च श्रुत्वा 'अहो ! दारुणविपाकताऽकार्याचरणस्य' इति जल्पन् संवेगमुपगतो राजा माताऽशेषजनपदश्च। ततः कुमारेण भणितम्–'तात ! ईदृशम् अकार्याचरणपरिणामं प्रेक्ष्य विरक्तं मे भवचारकाच्चित्तम्, विजृम्भितो जिनवचनप्रतिबोधः। तस्माद् अनुजानातु तातो येन तातप्रभावेणैव मनुजत्वं सफलं कुर्वे'। ततोऽनादिभवाऽभ्यस्तमोहदोषेण उत्तरकालमविचार्य प्रोक्तं राज्ञा–'हे पुत्र ! कस्तव प्रार्थनाभङ्गं करोति ?, सफलमेव तव मनुजत्वम्, तस्मात् परिणय तावद् एताम् ईशानसेननृपपुत्रीम्। ततः सम्यक्प्रजापरिपालनेन महान्तं पुण्यस्कन्धं कुर्याः'। तदा कुमारेणोक्तम्–'तात ! विज्ञप्तं मया भवत्पुरः प्रागेव यदुत 'विरक्तं मे चित्तं भवचा-



१ विकसितः–प्रकाशितः। २ पुण्यराशिम्।

रकात्, तस्माद् अलं मे स्त्रीपरिणयनेन'। तातेनोक्तम्—'दारपरिग्रहस्यापि कश्चिद् दोषोऽस्ति किम्?'। तेन भणितम्—'तात! दारपरिग्रहो नाम निरौषधो व्याधिः, [1]आयतनं मोहस्य, [2]अपचयो धृतेः, सभा व्याक्षेपस्य, प्रतिपक्षो शान्तेः, भवनं मदस्य, वैरी शुद्धध्यानानाम्, प्रभवो दुःखसमुदयस्य, [3]निधनं सुखानाम्, आवासो महापापस्य। एवं प्रतिपद्य पञ्जरगताः सिंहा इव समर्था अपि प्राणिनः परलोकसाधने मनुष्यभवलाभेऽपि सीदन्ति। अन्यच्च, तात! न युक्तं रत्नखचितेन स्वर्णस्थालेन [4]पुरीषशोधनम्। पुरीषशोधनतुल्याश्च विषयाः, अचिन्त्यचिन्तामणिसदृशं च जिनवचनबोधसङ्गतं मनुष्यत्वम्। कर्मभूमिश्चैषा, परमपदसाधनं च [5]चरणानुष्ठानम्, तस्माद् अलम् अन्यथाविकल्पेन, [6]अनुजानीहि मे सकलदुःखविनाशिनीं प्रव्रज्याम्' इति। ततो जल्पितं बाष्पार्द्रलोचनेन तातेन—'पुत्र! एवमेव एतत्, किन्तु परमार्थमपि जल्पन् स्नेहकातरं मे हृदयं पीडयसि त्वम्'। कुमारेण भणितम्—'तात! अलम् अपरमार्थप्रेक्षिणा स्नेहेन, यत एष स्नेह एव अत्र प्रधानं संसारकारणम्'। तातेनोक्तम्—'इयं तपस्विनी ईशानसेनपुत्री खेदं प्राप्स्यति'। कुमारेणोक्तम्—'तात! स्तोकमिदं कारणम्। अन्यच्च, निवेदयतु तातस्तस्या अपि एतद्वृत्तान्तम्, कदाचित् साऽपि [7]एनं श्रुत्वा प्रतिबोधं प्राप्स्यति'। ततस्तातेन 'युक्तमेतद्' इति भणित्वा प्रेषितः शङ्खवर्धनाभिधानः पुरोहितः। भणितश्च यथा—'अमुं वृत्तान्तं निवेदय राजपुत्र्याः, ब्रूहि च ताम्—एवंस्थिते किमस्माभिः कर्तव्यम्?'

---

१ गृहम्। २ व्ययः। ३ विनाशः। ४ पुरीषं विष्ठा। ५ चरणं चारित्रम्। ६ अनुज्ञां देहि। ७ वृत्तान्तम्।

इति । गतः शङ्खवर्धनः, आगतश्च स्तोकवेलायाम्, भणितं चाऽनेन—"महाराज ! संसिद्धाः कुमारस्य मनोरथाः । शृणोतु महाराजः—गतोऽहमितो राजपुत्र्याः समीपम् । 'महाराजपुरोहित' इति विज्ञाय प्रतीहारेणाऽहं सबहुमानं प्रवेशितः, अभिनन्दितो राजपुत्र्या, दापितमासनम्, उपविष्टोऽहम् । ततो मया भणितम्—'राजपुत्रि ! अस्ति किञ्चिद् वक्तव्यम्' इति । तयोक्तम्—'भणतु आर्यः' । मया भणितम्—'राजपुत्रि ! देवाज्ञा इयम्, सावधानीभूय श्रोतव्यम्' इति । ततस्तया सद्य आसनादवतीर्य 'यद् गुरव आज्ञापयन्ति' इत्युक्त्वा बद्धोऽञ्जलिः । ततो मया भणितम्—'राजपुत्रि ! इहागच्छतः कुमारस्य साधुदर्शनेन समुत्पन्नं जातिस्मरणम्, स्मृताश्च नव भवा, उक्ताश्च तेन, तान् शृणोतु भवती—इहैव क्षेत्रे विशाला नाम नगर्यस्ति । तत्राऽमरदत्तो नाम नरपतिरस्ति । इतश्च अतीते नवमे भवे तस्य पुत्रः सुरेन्द्रदत्तो नामाऽहमभूवम् । जननी मे यशोधरा, भार्या च नयनावली आसीत्' । यावदेतावन्तं जल्पामि तावद् मोहं गता राजपुत्री, आकुलीभूतः परिकरः ।'हा किमेतद् ?' इति विषण्णोऽहं, संसिक्ता चन्दनपानीयेन, लब्धा तया चेतना । मया भणितम्—'राजपुत्रि ! किमेतद् ?' इति । तयोक्तम्—'विचित्रता संसारस्य' । मयोक्तम्—'कथं विचित्रता?' । तया भणितम्—'यतः सा एव यशोधराऽहं तस्य कुमारस्य माताऽतीतपर्याये' इत्युक्त्वा कथितं कुमारभणितं निजकचरितम् । ततो मया भणितम्—'राजपुत्रि ! एतेन व्यतिकरेण विरक्तं कुमारस्य चित्तं भवचारकाद्, इच्छति स खलु प्रव्रजितुम्, ततो महाराजेन भणितम्—एवं स्थिते किमस्माभिः कर्तव्यमिति' ।

तया भणितम्–'विज्ञपय महाराजं यथा–तात ! ईदृश एव एष संसारस्वभावः कस्य वा स्वजनविज्ञानस्य विरागं न करोति ?, तस्माद् अलमत्र स्वप्नमात्रविभ्रमेण प्रतिबन्धेन । संपादय कुमारसमीहितम्, अनुजानीहि च ममापि प्रव्रज्याम्, यतो ममापि चित्तं भवचारकाद् विरक्तमेव" ।

एतच्छ्रुत्वा 'अहो मायेन्द्रजालसदृशता जीवलोकस्य !' इति भणित्वा परमसंवेगमुपगतो राजा । भणितं च तेन–'हे पुत्र ! न त्वं मम पुत्रः, अपि च धर्मे नियोजनाद् गुरुः । तस्मादलम् अस्माकमपि अनेन संसारपरिक्लेशेन, अहमपि त्वया सहैव प्रव्रज्यां ग्रहीष्ये' । एतद् नृपवचः श्रुत्वा राज्ञीभिर्भणितम्–'आर्यपुत्र ! युक्तमेतत्, किमत्र नटपेटकोपमेऽशाश्वते जीवलोके प्रतिबन्धेन ?' । ततो यशोधरकुमारेण भणितम्–'यथासुखं देवानुप्रियाः !, मा प्रतिबन्धं कुरुत' । ततो राज्ञा दापितं महादानम्, कारिता सर्वाऽर्हच्चैत्येषु पूजा, संमानितः स्वजनादिलोकः, स्थापितश्च स्वलघुपुत्रो यशोवर्धनाऽभिधानो राज्ये । ततो राजा यशोधरकुमारेण स्वराज्ञीभिरीशानसेननृपपुत्र्या विनयमत्या प्रधानजनपदेन च सह सुगृहीतनामधेयस्य भगवत इन्द्रभूतिगुरोः समीपे प्रव्रज्यामग्रहीत् । सर्वैरपि चिरकालं प्रपालितः साधुधर्मः । ततः कियता कालेन अनेकसाधुपरिवृतो यशोधरमुनीश्वरो ग्रामानुग्रामं विचरन् सुसमपुरासन्ने सिद्धार्थनाम्नि उद्यानेऽशोकतरोस्तले निरवद्यभूमौ समवसृतः । तदा समरादित्यजीवो मूलभवाच्चतुर्थे भवे तत्रैव पुरे वैश्रमणश्रेष्ठिनः पुत्रत्वेनोत्पन्नो धनदेवनामा स्वप्रियमित्रैः सह तत्रागतः । मुनीन्द्रदर्शनात् संजातस्तस्य प्रमोदः, वन्दिताः सर्वेऽपि

साधवः, तैरपि दत्तस्तस्मै धर्मलाभः। ततः सलावण्यं सतारुण्यं संपूर्णसाधुगुणोपेतं तं यशोधरमुनीन्द्रं वीक्ष्य तेनोक्तम्–'स्वामिन् ! किं ते निर्वेदकारणं येन अस्यां भोगयोग्याऽवस्थायां योगं प्रपन्नोऽसि'। ततः सर्वं स्वप्राग्भवचरितं निवेदितं तदग्रे मुनिना। तन्निशम्य धनदेवः संसाराद् विरक्तीभूतः प्रव्रज्यां जग्राह। ततः सर्वेऽपि साधवोऽन्यत्र विजह्रुः। यशोधरमुनीन्द्रा भूतले विहरन्तो बहून् भव्यजन्तून् प्रतिबोधयन्तः क्रमेण केवलज्ञानं प्राप्य मुक्तिं प्रापुः। अन्येऽपि केचित् साधवः साध्व्यश्च मुक्तिं जग्मुः, केचित् सुरलोकमिति। इति श्रीयशोधरचरित्रे नृप-जनन्योर्नवमभवयुतो दशमो भवः॥

---

भो भो भव्या ! इत्थम् अल्पमात्रहिंसायास्तीव्रतरविपाकसूचकं दशभवसंबन्धं श्रीयशोधरनरेन्द्रप्रबन्धं श्रुत्वा, सावधानेन मनसाऽर्थमवधार्य, प्रमाद-कषायादि परित्यज्य, स्वल्पामपि हिंसां मा कुरुत। श्रीजिनेन्द्रैरहिंसामुख्य एव धर्मः प्रोक्तोऽस्ति। असत्य-चौर्य-मैथुन-परिग्रहादीनामपि हिंसायामन्तर्भावाद् असत्यादिनिवृत्तिरपि तत्त्वतोऽहिंसैव ज्ञातव्या। यदुक्तम्–

इक्कं चिय इत्थ वयं निद्दिट्ठं जिणवरेहि सव्वेहिं। पाणाइवायविरमणमसेसा तस्स रक्खट्ठा॥ १॥

तस्मात् सर्वथा हिंसां परित्यज्य श्रीमदर्हत्-सिद्धा-ऽऽचार्यो-पाध्याय-सर्वसाधु-दर्शन-ज्ञान-चारित्र-तपःस्वरू-

---

१ एकमेवात्र व्रतं निर्दिष्टं जिनवरैः सर्वैः। प्राणातिपातविरमणमशेषास्तस्य रक्षार्थाः॥ १॥

पाणि नव पदान्येव एकाग्रमनसा शुद्धविधिना ध्यायत, येन सद्यो भवतां भवतापोपशान्तिः परमानन्द-पदप्राप्तिश्च संपद्यते, इति श्रीसद्गुरूपदेशः ।

श्रीमत्तीर्थपतिर्जगत्त्रयमतः श्रीवर्धमानः प्रभुर्जीयात्तत्पदपङ्कजैकमधुकृत् श्रीमत्सुधर्मा गुरुः ।
तत्सन्तानसमुद्भवा युगवरा देवर्द्धिमुख्यास्ततः पूज्यश्रीहरिभद्रसूरिगणभृद्वर्या गणाधीश्वराः ॥ १ ॥

सज्ज्ञानाद्भुतवर्धमानसुगुरुश्चारित्रिणामग्रणीः श्रीमत्सूरिजिनेश्वरः सुविदितः श्रीजैनचन्द्रस्ततः ।
संविग्नोऽभयदेवसूरिमुनिराट् श्रीमज्जिनाद्वल्लभः पूज्यश्रीजिनदत्तसूरिगणभृन्मुख्या मुनीन्द्रास्ततः ॥ २ ॥

सूरीन्द्राः सुतरां जिनादिकुशल-श्रीजैनभद्रादयस्ते सर्वेऽपि जयन्त्वमी भुवयुगप्राधान्यमाबिभ्रतः ।
येषां सर्वहितैषिणां सुमनसां सद्वाक्सुधास्वादतो मादृग् मोहविमूर्च्छितोऽपि झटिति प्राप्तः प्रबोधाङ्कुरम्
॥ ३ ॥ त्रिभिः सम्बन्धः ।

अपिच,

यन्माद्दशोऽपि मूढो महतां गुणवर्णज्ञोद्यतो भवति। तत्र ज्ञानदयानिधिगुरुप्रसादो हि सद्धेतुः ॥ ४ ॥

। इति श्रीसद्गुरुस्तुतिमङ्गलम् ।

वर्षे नन्द-कृशानु-सिद्धि-वसुधासङ्ख्ये (१८३९) नभस्ये सिते पक्षे पावनपञ्चमीसुदिवसे श्रीजेसलाद्रौ पुरे।
श्रीमच्छ्रीजिनलाभसूरिगणभृत्तुल्यप्रतापोद्धुरे कान्ते श्रीजिनचन्द्रसूरिमुनिपे धर्मेशतां बिभ्रति ॥ ५ ॥
सूरिश्रीजिनभक्तिभक्तिनिरताः श्रीप्रीतितिः सागरास्तच्छिष्यामृतधर्मवाचकवराः सन्ति स्वधर्मोद्दराः ।
तत्पादाम्बुजरेणुरासवचनस्मर्ता विपश्चित् क्षमाकल्याणः कृतवान् मुदे सुमनसामेतच्चरित्रं स्फुटम् ॥६॥
उत्सूत्रमिह यदुक्तं मोहात्तद्दुरितमस्तु मे मिथ्या। यदवापि पुण्यमस्मात् तुष्यतु सकलोऽपि तेन जनः ॥७॥

॥ इति परमपवित्रं श्रीयशोधरनरेन्द्रचरित्रम् ॥



॥ इति गद्यबद्ध-श्रीयशोधरचरित्रम् ॥